No. ४२५६

Title शास्त्रदीपिका द्वादशाध्यायः

Author पार्थसारथि मिश्रः

Extent ३० पत्र Age सं. १६९९.

Subject मीमांसा

प्रशस्त्रदीपिकाद्वादशाध्यायः

खरपद्दं

4256

श्रीगणेशाय नमः॥ तंत्रिसमवायेचोदनानांसमानानामेकृतंत्र्यमतुल्येषुतुभेदः स्याद्विधिप्रक्रमात्ता
दर्थ्यात्तादर्थ्यस्कृतिकालनिर्देशात्॥ सकृदनुष्ठितमप्यंगंबहूनांप्रधानानामेकदेशकालकर्तृकाणां
शक्तोत्युपकर्तुमित्युक्तं तत्रलक्षणोक्तमुपजीव्याक्तिमगत्यमाणविशेषत्वादेवैवंकुवत्वुतास्मादद
मनुष्ठानंनास्मादृत्येवंगत्यमाणेपिविशेषेऽन्यार्थेप्यनुष्ठितमप्यंगमन्यस्यापिदेशादेर्द्देश
क्तोत्युपकर्तुंनतादर्थ्येनपुनरनुष्ठानव्यमितिचिंत्यत इति तंत्रप्रसंगयोर्हेतुमत्ता। अग्नीषोमी
येपशावेष्टिकोविध्यंतः प्रवर्त्तते। तत्रपशुपुरोडाशोग्नीषोमीयस्यवपयाप्रचर्याग्नीषोमीयंपशु
पुरोडाशंनिर्वपतीति। अत्राप्येष्टिकोविध्यंतः। तत्रचिंत्यते। किंपश्वर्थानुष्ठितान्यंगानिपुरोडाश
स्यनोपकुर्वंतितेनतदर्थंपृथगनुष्ठातव्यानिउततैरेवोपकारसिद्धेर्नपृथक्पुरोडाशार्थेनांगा
नामनुष्ठानमिति। तत्र। अंगानिपशुकालानिपश्वर्थानीत्यसंशयात्अनागतेपुरोडाशकालेनहितत्
दर्थता। अन्यार्थानुष्ठितंचांगंनह्यन्यस्योपकारकं। तदर्थेनकृतंतस्यतथाप्रतीतिदर्शनात्। प्रकृतौ
हियदुद्देशेनांगमनुष्ठितंतस्यैवोपकारकंदृष्टंइहापिनान्यार्थमनुष्ठितमन्यस्योपकारकं। किंच। वि
धीयमानंकालादौकर्मसांविधीयतेस्वकालेतःपुरोडाशःकार्यःसांगसंगतः। वपाप्रचारकालेहु

नकेवलं प्रसंगे क्रमहान्येन वैगुण्यापत्तिः किंतु स्वकाले सौरव्याद्व्यवहान्यापि पश्मोहि तिष्ठंतं पशुं प्रयजतीति कालांतरं। सौरव्यांतरं च ए
कादशप्रयाजान्यजति एकादशानूयाजान्यजतीति द्रव्यविशेषः [illegible] पृषदाज्येनानूयाजान्यजतीति तेपुरोडाशस्य नोपकुर्वंति। तस्य
हि हविरासादनोत्तरकाले पंचसौरव्याकैश्च प्रयाजैः केवलाज्यद्रव्यकैश्चानूयाजैस्त्रिसौरव्याकैश्च प्रकृतिवद्भाव्यमित्याह गुणेति। ६

पद्दिष्टातिदिष्टसर्वांगयुक्ते पुरोडाशे कर्त्तव्यतया विज्ञायमाने कोन्नाम शास्त्रातिक्रमेण प्रधान
मात्रमनुष्ठातुं क्षमः। वैगुण्यं च प्रसंगसमाश्रयणे स्यात्। प्रयाजानंतर्यं हि आज्यभागं तदानं मां ३
तर्यं च प्रधानानां प्रकृतिवदतिदेशात्। तदिह पाशुकेषु प्रयाजेषु प्रसज्यमानेषु तदानंतर्यगुणहा
नाद्वैगुण्यमाज्यभागयोन स्वकार्यं साधयेयातां। अथ तु वैकल्पिकत्वात् शावेवाज्यभागावनुष्ठितौ
ततस्तयोरपि प्रसज्यमानयोः पुरोडाशस्य तदानंतर्यगुणलोपान्न स्वकार्यसाधनत्वं स्यात्। तस्मा
त्पाशुकानामंगानां पुरोडाशे प्रसंग इति तस्य सांगानि पृथक् कर्त्तव्यान्येव। गुणकालकृतं चापि
वैगुण्यं नाप्यईरितं। तेनापि न प्रसंगोस्तीत्येवं प्राप्ते विधीयते। विततेपाशुके तंत्रे समाप्तिमगते सति।
मध्यपतन् पुरोडाशस्तत्तंत्रमुपजीवति। चोदकेन पुरोडाशो यो विध्यंतः समर्पितः। ऐष्टिकः स पशो
र्वेव वितते दृश्यते यदा। तदा तेनैव संतुष्टः पुरोडाशविधिः स्वयं। प्राकृतानां पदार्थानां न्करोतु पसं
ग्रहं। पुरोडाशप्रयोगवचनो हि पशुतंत्रे विहितेन तदीयेषु प्रयाजानुयाजाद्यंगेषु लतकरिष्यमाणेषु
चोपकारेषु आरब्धाविष्टिनरूपेषु मनसि विपरिवर्त्तमानेषु तन्मध्ये पुरोडाशभावनां चोदक
समर्पितप्रयाजाद्यंगजन्योपकारयुक्तां विदधल्लाघवात्पश्वर्थैरेवोपकारैः साकांक्षामुपजीव्यया

रोडाशः प्राप्यैमते नचासौ पशावस्तीति तल्लाभाय ए×पु ४× यत्कर्त्तव्या प्रयाजादयः इत्यत आह नापीति। तद्धीति। न सौरव्या
कालद्रव्यभेदमात्रेण पशो प्राकृता कार्य [illegible] कार्यैकरूपत्वपदार्थे तद्धि चेः। प्रासत सौरव्या कालद्रव्य
मात्रं सपनीयते केवलं। कार्यं तु प्राकृतमेव। तेनैव च पुरोडाशस्यापि प्रयोजनमिति न स्य गुणादरः। न स्यकार्यार्थ्यैचा कार्य

इ निराकरणेन निराकृतं चोद्यं। पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति द्वे वाक्ये परस्परमनपेक्षमाणे द्वयोः कालयोस्त्रिकस्य त्रिक
इ स्य कृत्स्नाङ्गयुक्तस्य प्रयोगद्वयं विदधाते इति कः प्रसंगः प्रसंगस्य। प्रसंगे हि यथा चोदितानुष्ठानाक्रमादिलोपेन वैगुण्यान्नामावास्यास्वकार्य

गानि प्रस्तुतोनन्तर्भाव्यं तेन तद्युक्तमेव विदधाति। यद्विशिष्टं च प्रधानं विधीयते तेषामेव प्रधानकाल
त्वं क्रमप्राप्ताङ्गं भवति तेन प्रधानमात्रानुष्ठानेपि नास्ति शास्त्रातिक्रमः। नापि क्रमलोपो हेतुरुपं। तद्वि
कार्यस्य प्रयाजादिजन्यस्य कृतत्वात्तन्मात्रस्य च पुरोडाशेनावनयोपजीवनात् नाप्यस्व परिहृतं। न
न्वेवं पौर्णमास्यर्थकृताङ्गकृतानामुपकाराणामाफलापूर्वनिष्पत्तेरवस्थानादमावास्यायां न भूयः
प्रयाजादीनि कर्त्तव्यानि स्युः। तत्र त्रयोदशामावास्यायामिति वषट्काराहुतीनामाहवनीयगतानां
संख्यादर्शनं नोपपद्येत तदिदं वारुणप्राघासिकयोर्दक्षिणोत्तरविहारयोर्मिथः प्रसंगमुपजीवती
ति वैषम्यं। यत्तु प्रकृतावनन्योद्देशेनानुष्ठितान्यंगान्युपकारकाणि दृष्टानि इहापि पुरोडाशे तथैव कर्त्त
व्यानीत्युक्तं तदयुक्तं। नहि प्रकृतावुद्देशोंगं अविहितत्वात्। प्रयाजादिस्वरूपमात्रत्वं गं। आर्थिकस्त
त्रोद्देशः। न चार्थिकं चोदकः प्रतिदिशति। तस्मादस्ति प्रसंगः। अन्यार्थानुष्ठितांगस्यान्येनोपजी उन्यापक २५
वनं प्रसंगः।१।। जैमिनेः परं तत्रापत्तेः स्वतन्त्रप्रतिषेधः स्यात्।। स्थितं पाशुकैरंगैः कार्यसिद्धिर्न पुरोडा
शस्य पृथगंगानि कर्त्तव्यानीति। यत्पुनराज्यभागावघातादिकं पशौ न विद्यते तदपि पुरोडाशेन क
र्त्तव्यं न कर्त्तव्यं वेति। तदर्थमिदं विचार्यते। प्रसंगमुपजीवता पुरोडाशेन प्रयोगवचनमबाधित्वा चोदके
बाध्यते उत चोदकस्याबाधः प्रयोगवचनस्तु बाध्यत इति। तत्र प्रयोगवचनः प्रत्यक्षत्वान्न बाध्यते।
इ साधनाय पर्याप्नुयात्। इह त्वन्यस्य तन्त्रे विहिते ... विधीयमानः प्रसंग ४६

संशयः २

पाशुकेन चोदकेन पौरोडाशिकश्चोदको बाध्यते। कृतकरत्वान्निवृत्तिरेव चाधस्याशयः।१

॥ चोदकस्य त्वनुमेयत्वाद्दुर्बलो बाधमर्हति। लिङ्गात्ययोर्द्विप्रयोगवचनः प्रत्यक्षो न बाधितुं शक्यते। प्रकृ
तिवल्लक्ष्यस्यानुमानिको बाध्यते। तेन पाशुकेन प्रापितान्यंगकार्याणि पौरोडाशिकः प्रयोगवचनः सं
ग्रहीष्यतद्विशिष्टं प्रयोगं विधत्ते। तेरेव च पुरोडाशस्य निराकांक्षत्वाच्चोदको लुप्यते। तेन पशौ विद्यमाना
नामेव पुरोडाशेन संग्रहाद्दाड्यमानागाद्युपकरणमिति प्राप्ते ब्रूमः। चोदके नांगकार्याणां पुरोडाशान्वयेऽस्ति।
प्रयोगवचनः पश्चात्तद्विशिष्टं विधास्यति। यत्र खलु भावनासंबंधितया स्रुत्यादिभिरतिदेशेन वा स
मर्पितेनतद्विशिष्टां भावनां प्रयोगवचनो विदधाति। न तु स्वयमंगानि भावनया संबध्नाति। विधिमा
त्रव्यापारात्। न च पाशुकेन चोदकेन पुरोडाशान्वयोंगानां कार्याणां वा सिध्यति। तेनावश्यं पौरोडाशि
कश्चोदकोऽभ्युपगन्तव्यः। तेन प्राकृतेष्वंगेषु कार्यमुखेन भावनान्वयितया समर्पितेषु तद्विशिष्टां वि
दधत्प्रयोगवचनो यानि पश्वर्थतयैव प्रकृतानुष्ठानानि तैस्तथाविधैरेव तदुभयमुपजीव्यांगां
तरस्याकांक्षां विदधाति। तेन प्रयोगवचनैकदेशो यः प्रयाजोविषयः स बाध्यते। अंगांतरेषु सोऽपि न
बाध्यत इति सिद्धो भाड्यमानागादेरनुष्ठानं। कश्चित्तु प्रयाजादिष्वपि प्रयोजकत्वं विधेर्न बाध्यते।
अंगांतरेषु सोऽपि न बाध्यते सत्येव तत्प्रयोजकत्वे कार्यस्यान्यार्थैरेव सिद्धेर्नानुष्ठानं। एवं राम
चाप्रयोजकाद्विशेषो भवति। इतरथा प्रसंगप्रयोजकयोरविशेषः स्यादित्याह। तदिदमसारं। २

प्रयोगविधिरेव पौरोडाशिकः कृतकर

यदि शास्त्रेण पुरोडाशार्थं तयावपाप्रचारादूर्ध्वकाले प्रयाजादीनि कर्त्तव्यानीति बोध्यते कस्त
दा तदतिक्रमेणान्यार्थान्यंगानि उपजीविलुक्षमः। यदप्युच्यते प्रयोजनमप्यनुष्ठाने हेतुः न चेह
पृथगनुष्ठाने प्रयोजनमस्ति। अन्यार्थैरेव कार्यसिद्धेरिति। तदपि यत्किंचित्। [illegible]
[illegible]
[illegible] यदि शास्त्रात्पुरोडाशार्थं तयावंगं तं पृथगनुष्ठानं तदा तद्बलादेव फलं कल्प्यतां। पृथगनुष्ठि
तै रेव पुरोडाशस्योपकारः सिध्यति न पश्वर्थैरिति। यत्तु प्रयोजकबलोपेसति अप्रयोजकाद्विशे
षापत्तिरिति तदपि बुद्धिमांद्यं। अप्रयोजके प्रयुक्तिसामर्थ्यमेव नास्ति प्रसंगी तु प्रयुक्तिसमर्थ एव स
न्नन्यार्थानामुपजीवनं लाघवात्करोतीति एष विशेषः। यदि च सत्यपि प्रयोजकत्वे कामीनावादेनुष्ठानं न८
ततो वरुणप्रघासेषु तत्र वैहारिकै रेवांगैर्मारुत्याः कार्यसिद्धेः सत्यपि देशभेदे करणे देच विका
राच्च न भेदः स्यादर्थस्याविकृतत्वादिति नेतन्न्यायेन पृथगंगानि न क्रियेरन्। किंचावपाप्रचारा
नंतरकाले पुरोडाशीयादि सकलप्राकृतांगयुक्त एव कर्त्तव्यतया चोद्यते तत्तस्मिन्नेव काले सर्वांगे
षु प्राकृतेन क्रमेणाकार्यं तयावगम्यमानेषु यद्यपि कथंचित्प्राकृतानां प्रयाजाद्यंगानां काष्ठीतिनि
ष्पन्नत्वान्निष्पन्नपदार्थानि सन्निहितानीति कृतातानि न क्रियेरंस्तथापि यानि तस्यामेव वेलायां

न च पदार्थभेदे पि भिन्नकालेस्मिन् परिमाणविशेषावलंबिनं हि स्थलं वेदिः तत्र यत्परिमाणं न दृष्टं तन्निमित्तीकृत्य वेदिशब्दः प्रवृत्तः तद्भेदेपि तेन नि-
मित्तेन यस्मिन्स्थले वेदिशब्दः प्रवृत्तः तद्रूपं लौकिकमेव स्यात् हवेधीति २

पश्वर्थेनाप्यननुष्ठितानि अनुयाजादीनि तानि क्रमवशात्पौरोडाशिकेडापक्षानानन्तरमुपस्थितानि कर्त्त-
व्यतया पुरोडाशप्रयोगवचनाद्बोध्यमानानि किमिति न क्रियन्ते। न हि तदनुष्ठानं निष्प्रयोजनं। तत्कार्यस्ये-
दानीमनिष्पन्नत्वात्। अनुत्पन्नस्य प्रतीक्षणे कारणाभावात्। अस्मत्पक्षे पुनः पशुप्रयोगवचनसंनिधा-
पितान्यंगान्युपजीवन्पुरोडाशविधिर्यादृशानि तेन पूर्वापरकालवर्त्तीनि संनिधापितानि तानि तादृ-
शान्येव लाघवात्स्वप्रयोगोपजीव्याधिकानामेव प्रयोगं विधत्त इति युक्तं। नाविनामपि प्रसंगोपजीवने ना- सव्या १
नुष्ठानं। लाघवमेव प्रसंगे कारणं। आहुत्या अन्यार्थानुष्ठितैः शेषैरुपकारे कल्प्यकल्पना। प्रसंगे तदला-
3 वेचस्याङ्गस्य पिष्टप्रकल्पना। तस्मात्प्रयोगवचनैकदेशो लुप्यत एव। अधिकांगविषयस्त्वंशो न लुप्यत
इति सिद्धमाज्यभागादेरनुष्ठानं॥२॥ नानार्थत्वात्सोमे दर्शपूर्णमासप्रकृतीनां वेदिकर्म स्यात्। ज्यो-
तिष्टोमे यानि महावेद्यां कृतानि यां दर्शपूर्णमासप्रकृतीनि कर्माणि प्रवर्त्तन्ते तेतेषु महावेदेर्न दनप्राकृ-
तीवेदिः कर्त्तव्या नेति संदेहे यूपस्यांगप्रधानार्थमहावेदिस्तथापि प्रचारार्थत्वान्न हविरासादनार्थी-
याः प्राकृत्याः कार्यं साधयतीति तदर्थं प्राकृती कर्त्तव्या। नेवं। प्रचारार्थापि प्रसंगाद्धविरासादनम- रामा
पि शक्नोति साधयितुं न हि तस्यां क्रियमाणं हविरासादनं विगुणं भवति। वेद्यां हि हविरासादनं प्रकृ- २
तौ कृतं। न स्वार्थायामेवेति। तस्मात्प्रचारार्थे व प्रसंगाद्धासादनेनोपजीव्यते॥३॥ पात्नेषु चमसंगः

स्यात् होमार्थत्वात्॥ सोमांगपश्विष्टिकेषु कर्मसु किं सोमार्थान्येव पात्राणि प्रसज्यंते उत जुह्वादीनि पा
त्राणि पृथक् प्रयोक्तव्यानीति संदेहे सोमिकैरेव होमार्थैरिष्टिकानामपि होमादिकार्यसिद्धेः प्रसंगं
मन्यते। जुह्वादिकार्याणि होमादीन्यन्यैः क्रियमाणानि विगुणानि भवेयुः। न चात्रान्यैरेव होमादयः कृ
ता येन पृषदाज्यानुयाजवन्न पुनः क्रियेरन्। कर्त्तव्याः संतो होमादयः साद्गुण्ये संभवे किमिति विगुणाः
क्रियंते। तस्मान्न पात्रप्रसंगः॥४॥ शामित्रे च पशुपुरोडाशो न स्यादितरस्याप्रयुक्तत्वात्॥ अग्नीषोमीये
पशौ शामित्रोग्निः श्रपणार्थं कृतः। पशुतंत्रोपजीवी पुरोडाश इति स्थितं। अतः सोपि तत्रैव श्रपयितव्य
इति मन्यते। न पशुश्रपणेन पुरोडाशः श्रपितो भवति। तेन पृथक् श्रपयितव्यः पुरोडाशः चोदकप्राप्ते गा
र्हपत्ये श्रपयितव्यो वैगुण्यात्॥५॥ श्रपणे चाग्निहोत्रस्य शालामुखीये न स्यात्प्राजहितस्य विद्य
मानत्वात्। कौंडपायिनामयनेग्निहोत्रे किं प्राजहिते मुख्ये गार्हपत्ये श्रपणमुत शालामुखीय इति
संशये चोदकप्राप्ते शालामुखीये स्यादित्यापातितेष्टौ मे शालामुखीय एवात ऊर्ध्वं गार्हपत्यो भवतीति शाला
मुखीयो गार्हपत्यकार्ये विहितश्चोदकपरंपरया कुंडपायिनामयनं प्राप्तस्तस्मात्तत्र श्रपणं। सत्यं चोद
कादेवं। अग्निहोत्रनामधेयात्तु नैत्यमिकाग्निहोत्रवन्मुख्य एव गार्हपत्ये श्रपणं प्राप्तं तत्त्व चोदकाद्ब
लीय इत्युक्तं। केचित्तु रुबाचिंतामाहुः। असत्यपि नामधेये गार्हपत्ये हवींषि श्रपयतीत्यस्यानार

भिन्निसंदेहेऽनयोर्धानिर्वपतीत्यस्यप्र[stain]हितेः प्राप्तस्य सोमधारणाभ्यामपि प्रसंगतः सिद्धे निर्वा
पार्थेनानोंनरमुपादेयं

भ्यवादस्य सर्वार्थत्वादुपदेशतः प्राप्तः प्राजहितः शालामुखीयं चोदकप्राप्तं बाधत इति। ननु नैवमना
रभ्यवादस्य अर्पणहारकत्वात् कौण्डपायिनामयने च हविः अर्पणस्या [stain] श्रुतत्वात् प्रकृति
तः प्राप्तस्य सहैव प्राजहितेन प्राप्तेर्द्विरुक्तत्वान्नोपदेशसंभवः। तस्मान्नाम्नैव प्राजहितप्राप्तिः। ननु
सिद्धं नाम्नः प्राबल्यं सप्तमे। सत्यमिदं तु प्रसंगनिराकरणार्थं सूत्रं। शालामुखीयस्तावदस्मिंस्तं
त्रे चोदकेन सर्वगार्हपत्यकार्यायप्रवृत्तः। स एव प्रसंगादग्निहोत्रश्रपणमपि साधयिष्यति विना वि
तादर्थ्येनेति शंका। सेयं निराक्रियते। अन्यार्थस्य नामप्राप्तेन प्राजहितेन बाधितत्वादिति। पूर्ववत्ता
दुग्धसंभवे वैगुण्यानाश्रयणादित्यस्यैव न्यायस्य प्रपंचोऽयं।६। हविर्धाने निर्वपणार्थं साधयेतां प्र
युक्तत्वात्॥ ज्योतिष्टोमे हविर्धानसमाख्ययोः सोमधारणार्थयोरनसोः प्रवर्त्तने कृते यानि सव
नीयपुरोडाशादीनि तेषां किं तयोरन्यतरस्य निर्वपणमुतानोंतरमुपादेयं। सत्यमेतावत्संभवति
देशस्तु निर्वापस्यापरेण गार्हपत्यं निर्वपतीति प्रकृतितः प्राप्तौ हविर्धानयोर्न संपद्यते तयोर्मंत्र
वन्नियमवच्चमहावेद्यामवस्थापितयोः प्राग्वंशे नयनासंभवात्। तस्मादनोंतरमुपादेयमवैगु रुम ४
ण्यात्॥७॥ लघुत्वं च कालत्वेदात्॥ दीक्षाकालं जागरणमाम्नातं दीक्षोत्तरकालेषु प्रायणीयादिकर्म
सु किं चोदकप्राप्तं दार्शपौर्णमासिकं जागरणं कर्त्तव्यं नेति संशये सोमार्थेन दीक्षाकालेन जागर

ममागेनवर्त्तौविहवेष्विति सर्वमग्निंग[illegible]तो पर्वशस्यवलादाद्यधारणार्थं नत्र सोमिकव्रतोपायनेनैष्टिकजन्यादृष्टसिद्धौ प्रमाणाभावात् जागरणवत्प्रसंगइत्याशयः। सोमार्थ इति। तत्स्यादत्र देवरणासंपन्नो यथा त्वतीयेऽर्के[illegible]

ऐणेन प्रसंगात्कार्यसिद्धेर्न पृथक्केषु जागरणं कर्त्तव्यमिति। यदि तावदप्रमादार्थं जागरणं यज्ञसा-
धनरक्षणार्थं ततो नदीक्षाकालेषु रक्षितेषु तदुत्तरकाला निरक्षितानि संरुवंतीति पुनर्जागरितव्यं। अ-
थादृष्टार्थं जागरणं तथापि सोमिकेन जागरणेन नैष्टिकजागरणजन्यादृष्टसिद्धौ प्रमाणाभावान्न-
र्थं कर्त्तव्यमेव प्राकृतं जागरणं ॥७॥ मंत्राग्न्रसन्निपातित्वात् ॥ वरुणप्रघासेषु दक्षिणोत्तरविहारयोर्नि-
र्वापादिमंत्राः किं तंत्रेण। धर्मेणप्रतिप्रस्थात्रा वाऽन्यतरेण कर्त्तव्या उतोभाभ्यामपि इदं नेति संशये
न्यतरेण प्रयुच्यमानाः शक्नुवंत्युभयोः स्मर्त्तुं कर्त्तुमिति मन्यते। निर्वपामीत्यादेरात्मा त्रिवादिला-
न्नतं त्रेणासंरुवतीत्युभयोः पृथक्प्रयोगः। सहृदस हृदनुष्ठान प्रसंगात्तंत्रावापचिंतापीयमत्र सूत्र
॥८॥ धारणार्थत्वात्सोमेऽग्न्याधानं न विद्यते॥ सोमांगेष्वैष्टिकेषु कर्मसु चोदकप्राप्तमग्न्याधानं
कार्यं नेति संदेहे चोदकानुग्रहात्कर्त्तव्यमिति प्राप्ते ब्रूमः। धारणार्थं तु तत् ॥ सोमार्थे च विहृतस्य धारि-
तस्य चाग्नेस्तेन वधारणेन प्रसंगसिद्धकार्यत्वान्न पुनर्धारणं कर्त्तव्यं। ननु वाक्यनुसमाप्तेः पुनःपुनः प्रय-
त्नेन धारयितव्य एवाग्निः। सत्यं तथापि नान्वाधानं कर्त्तव्यं। न ह्यविहृतस्याग्नेराधोयोव्यापारो धारणा-
र्थत्वाद्रूपं। न हि तत्सकृत्तो पुनःपुनः कृतं। तस्मादनाविधाय मा[illegible]स्य धारणायाग्न्यन्वाधानेन कार्यं ॥९॥
मुपेत। तथा व्रतं लात् ॥ तत्रेवशाकृतं व्रतोपायनं कर्त्तव्यं नेति विचारे कर्त्तव्यमिति प्राप्ते सोमार्थे नापि तेनै-
वलक्षणोपि प्रसंगः संभवति। आद्यपक्षे त्वन्यार्थोपि [illegible] तस्योपपत्तेर्वैलक्ष्यसंगव्यापकं प्रसंगलक्ष-
णं ज्ञेयमिति।

वव्रते न सत्यं वदन् ब्रह्मचर्यादिसंकल्परूपेणास्मात्तिरविस्पष्टेन प्रसंगात्सिद्धेर्न पुनरुपायनं
कर्त्तव्यं ॥१०॥ ग्रहणार्थं च सर्वमिष्टेस्तदर्थत्वात् ॥ यदुक्तं धारणार्थत्वात्सौम्यन्वाधानं न विद्यत इ
ति तदाक्षिप्यते । यद्धि तत्केवलं धारणार्थं स्यात्ततो न विद्येत । तत्तु दर्शपूर्णमासयोर्देवतापरिग्रहा
र्थमपि श्रूयते मामग्ने वर्च इति पूर्वमग्निं गृह्णाति देवता एव तत्पूर्वेद्युर्गृहीत्वा श्वोभूते यजन्त इति
ततः प्रायणीयादिष्वपि तद्देवतापरिग्रहार्थं कर्त्तव्यमन्वाधानं । नैवं । न ह्यग्निधारणे दृष्टप्रयोजने स
त्यदृष्टदेवतापरिग्रहार्थत्वमर्थवादमात्रोपयुक्ताद्वाक्यशेषात्कल्पयितुं शक्यं । अभ्युपेत्य ब्रूमः
यद्यपि देवतापरिग्रहार्थं तथापि प्रायणीयादिष्वकर्त्तव्यं । दीक्षणीयाया अपि हि वाक्यशेषे देवता
परिग्रहार्थता श्रूयते । आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणोऽग्निरवमो देवतानां वि
ष्णुः परमो देवता एव तदुभयतः परिगृह्य दीक्षत इति । यद्यपि दीक्षाः सोमस्येति वचनात्प्रधानार्था
दीक्षणीया प्रधानदेवता एव परिगृह्णाति तथापि वैश्वदेवग्रहे सर्वदेवतासमवायात्तत्परिग्रहं कुर्वती या ४
दीक्षणीया प्रसंगादंगकर्मदेवता अपि गृह्णातीति । न हि विश्वेदेवशब्दः कस्यचिद्देवदेवतागणस्य राम
वाचकः । प्रसिद्धावयवार्थस्य समुदायस्य शक्त्यन्तरकल्पनाप्रमाणाभावात् । तस्मात्सर्वदेवता ५
वचनत्वात्तत्परिग्रहे च सर्वान्तर्गतानामंगदेवतानामपि प्रसंगतः परिग्रहादकर्त्तव्यमन्वाधानं । यद्वा

वासोधारणं दृष्टमपि नसंनहनस्य प्रयोजनं। योक्त्रेण पत्नीं संनह्यतीति द्वितीयाक्त्यापत्नीसंस्कारकत्वा तेनापि संस्काराद्
ष्ट एव परिकरबंधेन कर्मानुष्ठानसामर्थ्यजननादिति एवं त्वापरितुष्यन्पक्षांतरमाह अथापीति।२

भ्युपगमपक्षे दीक्षणीयायां कर्त्तव्यमेवान्वाधानं ततः परं तु न कर्त्तव्यं।११॥ सन्नहनं च कृतत्वात्॥ दार्शी
पौर्णमासिकं पत्नीसंन्नहनं प्रायणीयादिषु चोदकप्राप्तं कर्त्तव्यं। नैवं। वासोधारणार्थं तत् दीक्षाकालेन
च सामार्थ्येन सन्नहने न वाससो धारितत्वाद कर्त्तव्यं। अथापि न वासोधारणार्थं सन्नह्यते च कर्मानुका
र्याणीत्येवमर्थं सन्नहनं नादृष्टार्थं। अन्यार्थे नापि सन्नहने संनद्धैवेति न पृथक् सन्नहनं।१२। अन्यवि
धानादारण्याशनमपि प्रायणीयादिषु चोदकप्राप्तमपि रत्य
र्थत्वात्सौमिके नैव पयोव्रतादिना रक्तिसिद्धेरकर्त्तव्यं।१३॥ शेषभक्षास्तथेति चेन्नान्यार्थत्वात्॥ एवं त
र्हि शेषभक्षा अपि यजमानकर्तृकाः इडाभक्षणादयः तेपि रत्यर्थत्वात्सौमिके नव्रतेन निवर्त्तेरन्। सत्यं
यदि रत्यर्थाः। ते तु शेषप्रतिपत्त्यर्थाः। यजमानपंचमा इडां भक्षयंतीति शेषस्य द्वितीयानिर्देशात्। त
दिदं षष्ठे साधितं। तस्य त्विदं प्रयोजनं कृत्यनंप्रसंगात्मकत्वादिहोक्तं।१४॥ भर्तृत्वाच्चापरिक्रयः। दी
क्षणीयादिषु चोदकप्राप्तमन्वाहार्यदक्षिणादानं त्यानेति संशये दक्षिणाः सोमस्येति वचनाद्द्वादशश
तदक्षिणा केवलप्रधानार्थेत्युक्तं। अतोंगेषु स्वार्था दक्षिणा दातव्यैव। प्रसंगसिद्धकार्यत्वान्न दात
व्या। प्रधानार्थं त्वानतिरुपक्रमप्रभृति आसमाप्तेः प्रस्तावानपवक्ता चाव। स्थितेति तामेवापजीवंतो दीक्ष
णीयादिविधयश्चोदकप्राप्तामपि स्वार्थामानतिं न प्रयुंजते। किं च पृथग्दक्षिणायां सत्यामानतिभेदादं
सिद्धांतमाह आरण्येति। कर्त्संस्कारकस्याशनस्य कर्तृशरीरवृत्तिरेव कार्यं तत्तु देशेनैव प्रवृत्तेस्सिद्धमित्यनुषंगिकी

दक्षिणाः सोमस्येति वाक्यस्य प्रसंगापवादार्थत्वं वाचकमाह किं चेति। कर्तृभेदे च प्रयोगभेद आपद्येत।

गप्रधानानामश्रुतः कर्त्तृत्वेदन्या पद्येत। किंच यैः प्रधानं कर्त्तव्यं तैरेवावश्यमंगान्यपि कर्त्तव्यानि नाकु
र्वद्भिरंगानि प्रधानं [illegible] कर्त्तुं शक्यमिति निश्चिते शास्त्रार्थे प्रधानार्थत्वेनांगानां बलादंगान्य
द्वी२ पिकर्त्तव्यानीति प्रसंगसिद्धे[illegible]नुष्ठानत्वान्नांगं दाक्षिण्या॥१५॥ शेषलक्षास्त्वर्थे निवेत्॥ सर्वं य
जमानलक्षस्य वृत्त्यर्थत्वाद्भूते न निवृत्तिराशंकिता सं प्रति त्वात्विग्लक्षाणां परिक्रयार्थतया प्रधा
नदाक्षिण्याया निवृत्तिराशंक्यते। निराकरणं तद्वदेव शेषप्रतिपत्त्यर्थलक्षानामनत्यर्थाद् इति। दश
मएव चानत्यर्थत्वं लक्षाणां निराकृतं। तस्येदं प्रयोजनं प्रसंगात्मकत्वादिहोक्तं॥१६॥ प्रवृत्तवरणत्वात्त
तितंत्रं होतुः क्रियेत॥ दर्शपूर्णमासयोर्होतृवरणमाम्नातं। अग्निर्देवो दैव्यो होतेति। न हि मानत्यर्थ
त्वं सोमिके नैव वरणेनाग्निर्होतास मे होतेत्यादिना प्रसंगादानतिसिद्धेः दीक्षणीयादिषु न कर्त्तव्य उत्ता
दृष्टार्थत्वात्कर्त्तव्यमिति संशये वरणस्यानत्यर्थत्वान्निवृत्तिं मन्यते। ननु प्रवृत्ते कर्मणि क्रियमाणमनुया
ज्यावरणवददृष्टार्थं। नैवं। अनुयाज्यावरणमादावेवानत्यर्थे कृते वरणे पश्चात्क्रियमाणमदृष्टार्थं स्या
त्। होतुस्तु न प्रागस्ति वरणं। अतः प्रवृत्तेपि कर्मणि दृष्टार्थमेव ब्रह्मवृणवत्। तदपि हि सर्वेषु रेवामावा शाम २२
स्यायां वेदिकरणेनुमतिदानेप्रवृत्ते ब्रह्मणि अपरेद्युः प्रवृत्ते प्रणीताप्रणयनकाले क्रियते। अथ वद ६
ष्टार्थमेव। अन्यथा तदपि दीक्षणीयादिषु कर्त्तव्यं स्यात्तस्माद्धोतुर्वरणमपि न कर्त्तव्यमिति प्राप्ते ब्रूमः।

तंत्रिमध्यपातए वसर्वत्रसंगहेतुरुलोपकारानपवर्गीभा त्रंदिति संशयोऽथ संशयमाह त्रयेति। बर्हिरूपादानार्थं लवनसद्भावेऽपि विना बर्हिः साधार
ण्यानुपपत्तेर्लवनोत्तरभाविनामेव संस्काराणा। मिह सकृत्त्वासकृत्त्वचिंता विषयता प्रोक्षणादेः स्वापास्य चिंता। मध्येति।
पाते नैवोपकारानपवर्गावगमा त्नोसावत्रास्तीसाशयः। नन्वेवं वर्हिर्लवनस्यैव तंत्रमेवास्त्विवसत ओह नापीति। बर्हिः

प्रवृत्तस्य वरणं न कथंचिद्दृष्टार्थं भवति। दक्षिणादानं हि ऋत्विग्[illegible]दवस्थमपि भवत्यानतिनिमित्तं। लोके
तथादर्शनात्। ननु वरणेन नाविनाभवस्यानमनं। तस्माददृष्टार्थं। ब्रह्मवरणं च प्रवृत्ते ब्रह्माणि क्रियते। पौ
र्णमास्यां तावद् प्रवृत्तएव क्रियत इत्यविवादं। अमावास्यायामपि पूर्वेद्युरपकृष्यमाणो वेदिः स्त्रीगर्भन्न
प्रसंग वसिद्ध्ये ब्रह्मणो वरणमप्यपकर्ष[illegible]तीति लिंगाद्धि वरणस्यानंतरे वप्रयोजनं गम्यते। प्रयोजनवशे
न तु पाठक्रमं बाधित्वा युक्तमेव वरणस्य पूर्वेद्युरनुष्ठानं। तस्माद प्रवृत्त विषयत्वाद् ब्रह्मवरणं दृष्टार्थं।
न चैवं होतृवरणस्यापकर्षः संभवति। अग्नेः सामिधेनीरन्वाहेति वचनात्। तस्माददृष्टार्थं होतृवर
णं प्रतिकर्म कर्त्तव्यं॥ १७॥ यद्योत्पत्त्युपदेशे निश्चितकर्मप्रयोगभेदास्यति तंत्रं क्रियेत। यद्यपि तिथ्यायां ब
र्हिस्तदुपसदां तद्ग्नीषोमीयस्येति बर्हिः साधारणविधिरित्युक्तमेव। तथापि मर्थं नोपात्तं बर्हिषि
संस्काराः प्रोक्षणादयस्त्विंत्यं ते किं ते प्रतिकर्माववर्तनीया उत। तिथ्याकालकृता एवोपसदग्नीषोमी
येच्चप्रसज्यंत इति संदेहे मध्यपातन्नावान्नप्रसंगो नापि तंत्रमातिथ्याकालत्वेन विशेषग्रहणादिति
प्राप्ते ब्रूमः। सत्यं न तंत्रता प्रसंगस्त्वभवति तंत्रमध्यपाताभावेऽपि बर्हिर्द्वारा पे संस्कारास्ते पदार्थं बर्हि
रूपात्तं नदर्था विज्ञायमाना बर्हिः साधारण्यात्तेऽपि सकृदेव कर्त्तव्या इत्यवगते सति नांतरीयकतया
तिथ्याकाले नुष्ठानं। उपसदादेस्तदानीमप्राप्तत्वात्। न चैतावता तिथ्यापवर्गेऽपरज्यंते। बर्हिषो न
यावदनपवर्गावगमात्तंत्रिमध्यपातफलं बर्हिः साधारण्यादेव सिद्धमिति साशयः। ननु यस्मात्तंत्रिणामध्येयः पत
तिसप्रसंगी इतरस्तोत्रीसाधारण्येऽत्र [illegible] प्रसंगी नित्यं नियामकमि[illegible] सतत्र नांतरीयकमिति। शास्त्रीये
नियतक्रमासाधम्यमत्रनतंत्रिचेनियामकंतदुत्तरस्य प्रसंगित्विऽसथः ६

रह बर्हिरर्थे च सनह नहरणे इति निर्विवादं तथापि सन्नहनहरणयोस्तयोरनुपकारकत्वादाद्विसावासिद्धेर्यावत्तदेवेति उत्तरवेदि सा
मीप्यात्तथाहरणस्याप्यादृत्तिरुक्ता। प्राग्वंशस्तरणार्थमपि सन्नहनादिकरणाद्यौत्तरवेदिस्तरणार्थं सन्नहने हरणे च विनिनं नवानि मंशये
संशयमाह नौ किमिति। सन्नहनेति। आवश्यकत्वाद्विधिमेदाभावाच्चादनुग्राहकशब्दात्तदाधिकावाच्यं नो च कर्मभेदहति इति। मेव
पदकृत्वात्तदर्थत्वाच्च तेषां। तस्मान्न भेदेन कर्तव्याः॥१८॥ देशाद्यथ क्वान्मंत्रौ प्यावर्तते॥ तदेव बर्हिर्यदा
तिथ्यार्थं प्राग्वंशे स्तीर्णं तत आनीयापरेणोत्तरवेदिमग्नीषोमीयार्थेन स्तीर्यते तदा किमूर्णाम्रदसं त्वास्तृणा
मीति स्तरणमंत्रः पूर्ववदुत उत एव प्रसज्यते उतावर्तनीय इति विचारे पूर्ववद्बर्हिःसाधारण्यात्प्रसंगप्राप्तावुच्य
ते। स्यादेवं यदि बर्हिरर्थं स्यात्तत्तु बर्हिषा वेदिं स्तृणातीति द्वितीयानिर्देशात्प्रयोजनवत्त्वात्स्ववेदिदेशसंस्का
रार्थं नियतो चेह प्राग्वंशोत्तरवेदिसमीपदेशे। तेन तदर्थं स्तरणं तदंगं च मंत्रो प्यावर्तेत। असत्यामावृत्तौ
वेदिर्वैगुण्यादग्नीषोमीयहविषामासादनं विगुणं स्यात्॥ न वस्तुवा बर्हिरर्थं स्तरणं बर्हिष्यवस्तीर्णे हवी
षि साक्षाद्वासाद्यं तद्वृत्तितथापि कथाचित्तदारते स्तादंगमंत्रावृत्तिः। अन्यथा हस मात्रास्तीर्णे बर्हिषि हवीं
षि साधयेरन्॥१९॥ सन्नहनहरणे तथेति चेत्॥ तदेव बर्हिः प्राग्वंशे स्तीर्णं पुनः सन्नह्योत्तरवेदिसमीपे स्ती
र्यते। प्रकृतौ सन्नहनमंत्रः पूषा ते ग्रंथिं ग्रथ्नात्विति। तथा हरणमंत्रः बृहस्पतेर्मूर्ध्ना हरामीति। तौ किमस्मि
न्सन्नहने हरणे च प्रयोक्तव्यौ नेति संदेहे सन्नहनहरणयोरावृत्ते मंत्रयोरपि पूर्ववदावृत्तिः स्यादित्येवं। प्रकृ
तौ छिन्नस्य बर्हिषो यद्विहारदेशप्रापणार्थं सन्नहनं हरणं च तदर्थावेतौ मंत्रौ विहारदेशं प्रापितस्य बर्हि
षो वेदिप्रापणार्थमेतत्॥ अतो न्यकार्यत्वात्कार्यप्रयुक्तत्वाच्च मंत्रयोर्न मंत्रप्रयोगः। यथा प्रकृतावेव गार्हप
त्यादाहवनीयं नीयमाने बर्हिषि मंत्रो न प्रयुज्यते तथेहापि॥२०॥ ॥इति शास्त्रदीपिकायां द्वादशाध्याय

कर्मस्मार्त्तं विवाहाग्नौ कुर्वीत प्रसंगतः ।। दायकालाहृते वाग्निश्रौतं वैतानिकाग्निषु इति औपासने विधानं ५

स्य प्रथमः पादः ।। विहारो लौकिकानामर्थं साधयेत्कर्मत्वात् ।। किं गार्हपत्याग्निर्लौकिकानां तापपचनादीनां
चरुपुरोडाशश्रपणादीनां च सर्वेषामग्निकार्याणामंगभूत वैदिकानामेवेति संशये सामर्थ्यात्मकाल्लिंगान्मां
सपाकनिषेधदर्शनाच्च सर्वार्थता प्राप्तावुच्यते। गार्हपत्ये हवींषि श्रपयति दक्षिणाग्नावन्वाहार्यं पचति यदाह
वनीये जुह्वतीति प्रत्यक्षवचननिर्दिष्टैरेव प्रयोजनैर्निराकांक्षाणां न लिंगेन सर्वार्थता शक्या कल्पयितुं। मां
सपाकप्रतिषेधस्तु वैदिकवपाश्रपणे प्राप्त्योपपन्नः। स्थालीपाकादयस्त्वौपासने विहितान सामान्यविहि
तान् गार्हपत्यादीनपेक्षन्ते। तस्माद्वैदिकानामेव विहारोंगं। एवं बर्हिःसंस्काराणां साधारण्य साधारण्य
साधारण्ये विचारिते तत्प्रसंगादग्नीनां लौकिकालौकिकसाधारण्यं विचारितमिति संबंधः।। १ ।। सवनी
ये च्छिद्रापिधानार्थत्वात्पशुपुरोडाशो न स्यादन्येषामेव मर्थत्वात् ।। सवनीयपशावग्नीषोमीयात्पशोश्चाद
क प्राप्तः पशुपुरोडाशः कर्त्तव्यो नेति संशये न कर्त्तव्यः। सहि प्रकृतौ च्छिद्रापिधानार्थः सुषिरो वा एतर्हि पशु
र्यर्हि वपामुत्खिदति यद्व्रीहिमयः पुरोडाशो निरूप्यते अपिहित्या अच्छिद्रताया इति। सवनीयपशौ च स
वनीयैरेव च्छिद्रापिधानं कृतं। तत्रापि श्रूयते अनुसवनं सवनीयाः पुरोडाशान्निरूप्यन्ते अपिहित्या अच्छिद्र
ताया इति। तस्मात्तैरेव कृतकार्यः पुरोडाशो निवर्त्तते। ननु पुरोडाशो न माध्यंदिने सवने इति लिंगात्कर्त्तव्यः। एवं
तर्हि विकल्पोस्तु नामैवं। अर्थवादमात्रं च्छिद्रापिधानवचनं। प्रत्यक्षविरोधात्। देवतासंस्कारार्थस्तु सः। तस्मात्क

एकवचन न लिंगोपपत्तेर्द्वितीयं पूर्वपक्षमाह एवमिति। [illegible] चकस्मात्स [illegible] गेकार मतं सकृत्काकृत इत्सापर्सी वाक्ये: १

किंह विष्कृतसमाख्यया साप्राकोतहविष्करणमात्रार्थाउतलिंगात्साहाय्यकरणमात्रार्थेतिसंशयोयंसंशयमाह तेषितिसमाख्यायामुख्यार्थत्वसंभवेगौणार्थतानयुक्ता। नचलिंगप्रकरणाभ्यांसाहाय्यकरणमात्रार्थत्वात्तगौणार्थत्वं। यथाहिर्थाःप्रयुक्तावोदितत्रलिंगप्रकरणाभ्यांसमाख्याबाधेपूर्वपक्षितेलिंगप्रकरणापेक्षितावत्त न स्वाकुर्वतीसमाख्यात्रेप्यएवा। लिंगंचपुरोडाशेनमाध्यंदिनइतिनपाक्षिकंकल्पयितुंन्याय्यं॥२॥ हविष्कृत्सवनीयपुनस्याहूतोयदिसर्वार्थापश्वुप्रत्याहूतासाकुर्याद्विघमानत्वात्। प्रकृतौपात्रप्रोक्षणानंतरमवघातकालस्तस्मिन्कालेत्रिरवघ्नत्राहूयतीतिहविष्कृदाह्वानं। तदाज्योषधसान्नाय्यानांसर्वेषामंगमितिकृत्वाचिंत्यते। तदाहिसान्नाय्यविकारेपशावपिपात्रप्रोक्षणानंतरमस्तिहविष्कृदाह्वानं। अतश्चसवनीयपश्वर्थेनतदीयपात्रप्रोक्षणानंतरमाहूताहविष्कृत्तन्मध्यपातिनांसवनीयपुरोडाशानांप्रसंगासिद्धेर्नपृथगाह्वातव्येतिसिद्धमेवोत्तरविवक्षयाप्राप्यते॥३॥ पशौतुसंस्कृतेविधानान्नान्यार्थापसवनिकेषुस्यात्सौम्याश्विनयोश्चापरत्वात्॥ संतित्रतीयसवनेसवनीयाःपुरोडाशाःसौम्यश्चरुराश्विनश्चद्विकपालःतेचसवनीयेपशोपक्वेक्रियंतेतेषुकिंहविष्कृदाह्वातव्योनवापूर्वकपेवप्रसज्पतइतिसंदेहे हविष्कृत्समाख्यायाहविष्करणमेवतस्याःकार्यं। अतःपक्वेपशौतदर्थाहविष्कृत्कृतकार्यत्वादपरकेतिततःपरेषुपुनराह्वातव्येतिप्राप्तेब्रूमः। साहाय्यकरणमाह्वानस्यकार्यंसामर्थ्यात्। नकेवलंहविष्करणमेव। मुख्यत्वानुहविष्करणेनसमाख्यायते। तेनाहूतासतीप्राग्उत्थानविधानात्प्रोत्थातुमर्हति। प्रकृतौनुपत्नीसंयाजेभ्यःपश्चात्तस्याउत्थानंविहितमितिसर्वेनी[illegible]येपिपशावापत्नीसंयाजेभ्यःसन्निहितेतितकालवर्तिनांतार्तीयसवनिकानांनजेदेनाह्वातव्या॥४॥ ॥निशियज्ञेप्राकृतस्याप्रवृत्तिःप्रत्यक्षशिष्टत्वात्॥ याजानंतरंउत्थानविधानात्तस्याःदृष्टार्थत्वपरिहारायसमाख्याप्रमाणिकाहविष्करणार्थतामपिअतिक्रम्यततःपरमपिपत्नीसंयाजांतंयावत्किंचित्साहाय्यकरणादर्थतोप्यवगम्यतेतावतागौणाहविष्कृत्समाख्यायाइत्याशयः॥५॥

8

तंत्रमध्यपातमात्रेण प्रसंगो भवत्युत नेति संशयो यं संशयमाह तस्मिन्निति।२

इध्माद्विजन्यदृष्टोपकारनिष्पत्तेस्तत्प्रयोजकताल्पेवेत्यारभ्यतत इति। सौर्यादौ तु काम्ये तत्कालस्य पर्वमात्रस्यामावास्या निशायाः दर्शे

काम्यास्त्विष्टिषु श्रूयते। अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यो रक्षोभ्यो बिभियादिति। तत्रापरं व
चनं। अमावास्यायां निशि यजेतेति तस्मिन्निशि यज्ञे चिंत्यते किं पृथक्तंत्रं कर्तव्यमुत दार्शिकमेव तंत्रं प्र
सज्यत इति। तत्रामावास्यायां निशीति सामानाधिकरण्यात् कालवचनोमावास्याशब्दो न कर्मवचनः। का
ले चानपेक्षः प्रवर्त्तते कर्मणि तु कालापेक्षा वृत्तिरतोपि कालवचनः। तेन वाक्यात्तावन्नामावास्याकर्म
णामुपस्थानं। नापि प्रकरणात्तदभावात्। अतो नालोच्य दर्शे विधीयमाना निशीष्टिः तत्तंत्रोपजीवना संभ
वात्स्वांगयुक्तैव निशायां कर्त्तव्यतया विधीतेयं इति नास्ति प्रसंग इति प्राप्ते ब्रूमः। यद्यपि वाक्यात्प्रकरणेन
वानोपस्थानं तथापि यस्मिन्काले विधीयते सतावन्नियमेन प्रवृत्तामावास्यातंत्र एव। तेन तत्र विधीयमाने
ष्टिस्तत्तंत्रमध्यविहिता भवति। अवश्यं [illegible]स्य भावगतौ मावास्यातंत्रमालोच्यैव निशीष्टिर्विधातव्या। अन्य
चार्थ६ थाग्निप्रणयनव्रतोपायनमपि विदध्यात्। तच्चाशक्यं। प्रणीतानामावास्याग्नीनां पुनः प्रणयनासंभवात्। ३
पेतस्य च व्रतस्यानुसृष्टस्य पुनरुपेतुमशक्यत्वात्। तस्मादालोच्यैव दर्शे तंत्रं विधीयमानेष्टिर्यत्तंत्रमुपजीवितु
मशक्यमभिधाबर्हिः सामिधेन्यादितन्मात्रं स्वयं प्रयुंक्ते। अन्यत्तु दार्शिकमेवोपजीवति विहृतत्वं तराणि तु सौ
र्यादीनि पौर्णमास्य[illegible]मावास्ययोर्विधीयमानान्यपि न प्रवृत्ततंत्रायां प्रकृतौ विधीयंते। प्रागेव प्रकृ
त्यारंभात्तदनुष्ठानसंभवात्। इयं तु निशायां विधीयमाना तंत्रमध्यपातिनी प्रसंगमुपजीवतीति वैषम्यं॥५॥

ष्टितंत्रमध्यपातान्नैयस्याः क्वाचान तत्प्रयोगस्यैतेषां अग्नेय
संग उद्देशे निवृत्ता हि।३

ननु नवमे सर्वदर्शपूर्णमासप्रयोगारंभे क्वापि देवस्य कृतत्वात् सर्वप्रकृतिप्रयोगार्थाद्दुष्कृतं विकृतेस्तु प्रयोगभेदात् पुनः कार्यं चेत्तत्राह
प्रकृतावितिः। अयं भावः। अयमपि तत्रासिद्धान्तहेतुरुक्तः वा क्वापि दार पूयमान पुरुषसंस्कारार्थापि न विषयदर्थेऽल्पारंभात् सर्वत्वाद्धि हि।
प्रयोगविधानात् सिद्धं कृते वाग लक्षणविशेषफलो सर्वप्रकृतिप्रयोगार्थेति। तद्वन्नेन ४३४ बहुना तत्रसासिद्धान्तसिद्धावारंभे क्रममस्तु
अरंभणीयाविकृतौ न स्यात्। अकृतौ कालमध्यत्वात् कृता पुनस्तदर्थेन। सोर्थादिष्वारंभणीया स्यात्तैव न १
तिविचार न स्यादिति ब्रूमः। प्रकृतौ हि सकृदेवेयं कर्त्तव्या न प्रतिप्रयोगमावर्त्तनीयेत्युक्तं नवमे। यदि
वसकृत्कृतयैवानया संस्कृतः पुरुषोयावज्जीवं संस्कृत एव भवतीति ततो स्याः सकृत्करणं युक्तं। अप ४३
रके तु तत्संस्कारे पुनः पुनस्तत्सिध्यर्थमनुष्ठातव्या स्यात्। तेन प्रकृत्यर्थं कृत एव संस्कारेन पवृत्तः प्र
संगेन विकृतीनामुपकरोतीति न तास्वारंभणीया कर्त्तव्या। उच्यते। न संस्कारावस्थानात्सकृताव नावृत्तिः
किं त्वारंभकत्वात्। आद्या हि क्रतुः प्रवृत्तिरारंभकः। स चैकस्य कर्त्तारेक एव। अतस्तदपवर्गे पवृत्त एव तदर्थः
संस्कारः। पुनः पुनः प्रयोगे हि प्रयोगा एव वर्धन्ते न क्रत्वारंभः। क्रत्वारंभांगं चारंभणीया। दर्शपूर्णमासशब्द
स्य क्रतुवचनत्वात्। तस्मान्न पुनः पुनः प्रयोगे त्वारंभणीया विकृतिषु त्वारंभे दाचोदकप्राप्ता रंभणीया
कर्त्तव्ये वारंभवेलायां॥ ६॥ विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वं॥ पंचदशरात्रे ग्निष्टुदथ
ममहः तत्रैकाहाग्निष्टुद्धर्मा नामधेयेन प्राप्यंते। तेनाग्नेयी तत्र सुब्रह्मण्या। ततो ज्योतिर्गौरायुरिति त्र्यह
ः। तत्र ज्योतिरादिनामधेयेरेकाहज्योतिरादिधर्मप्राप्तिः। तेन तेष्वैन्द्री सुब्रह्मण्या। परिशिष्टान्येकादश
हानि द्वादशाहिकानि। तेष्वप्येंद्र्येव। इह चोरकपासें द्रीधर्मकाण्डमेकादशनामकानामप्याग्नेयीधर्म
कर्मकस्य चाग्निष्टुतो विरोधे चिंत्यते। पक्षनाम्नामेव तुल्योतिरादीनामग्निष्टुतस्य मिथश्चिंता। तत्रोपसत्का
पले तस्मिन्नेव कर्त्तव्येति तत्कालस्येव प्रयोगस्योपकुर्यात् नान्येषां विशेषग्रहणात्। अतः प्रयोगान्तरे पुनः कर्त्तव्येवस्यात्। तान्निरा
सायावश्यमारंभैकमेव सिद्धान्तन्यायाभावाचः संस्कारार्थपवगे रवत्युस्त्र यद्रसाशयः। आरम्भे कोपचनावमिकसि

तत्र भूतायां इत्यनेनैकादशो सुब्रह्मण्यानुतं त्रंदीक्षावदन्यकालत्वादिस्तत्रोक्तं तस्याः सन्दंशकरणस्मारितं॥१ न चैंद्राग्नेयीसुब्रह्मण्ययोरेकार्थ्य
आज्यभागोपाद्याधिष्ठार्थे सांस्त्रयाजादिवत्तत्रेणानुष्ठानमविलसाहनचेति।८
मस्त्रियेनतयोरन्यतरस्याः सुसांत
रेप्रसंगः स्यादित्याह नचेति २

लसुब्रह्मण्यैयां तत्र भूतायां किमनियमं ताग्नेयीत्राध्यायथवेंद्राति। तत्रानियमो मुख्यत्वाद्धाग्निषु
दूर्मानुग्रहे प्राप्ते भूयसां साधर्म्यायैंद्रीति सिद्धांतितं। नत्विहसुब्रह्मण्योदाहरणं युक्तं। यत्रान्यार्थेनान्यस्योपका
रसिद्धिस्तत्रप्रसंगः। नचाग्नेय्यासुब्रह्मण्ययैंद्रः संस्कृतो भवत्यैंद्राग्नौ वाग्निः। अतएवन तंत्रता। तेनोभावपिच्छेदेना
ह्वातव्या वित्यनुदाहरणं। कास्यात्विषिषु भूयते। अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिंद्राय प्रदात्रे पुरोडा
शमेकादशकपालं दधिमधुघृतमापोधानास्तत्संसृष्टं प्राजापत्यं पशुकाम इति। तदिमानि समह वीषि आग्नेयमैंद्रं
प्राजापत्यानि पंचेति। तत्राग्नेयं प्राजापत्यं मध्याना आग्नेयविकारत्वादुभयथाप्यविरुद्धाः। यस्त्वैंद्रः पुरोडाशः यच्च
प्राजापत्यं दधितयोरैंद्राग्नसान्नाय्यविकारत्वाद् मावास्याधर्मापेक्षा। मधुघृतापां तु उपांशुयाजविकारत्वात्पौर्ण
मासिकधर्मापेक्षा। मधूदकयोरप्यविकारत्वमष्टमे सिद्धं। घृतस्य लसंदिग्धमेव। तदेतेषु सप्तसु प्रधानेषु सहप
क्रांतेषु पौर्णमासीविकाराणां वार्त्रघ्नावाज्यभागमंत्रौ प्राप्तौ दर्शविकारयोस्तु वृधन्वंतौ॥ न चान्यतराभ्यांस्तावा
ज्यभागौ पुनर्मंत्रार्थमावर्तेयातां। तदिह किममावास्यामंत्राभ्यामाज्यभागौ कार्यौ ताभ्यामेव चप्रसंगसिद्धकार्यत्वात्पौर्णमा
सिकौ मंत्रौ निवर्तेते। अथवा विपर्यय इति संदेहे अनियमो मुख्यत्वादिंद्रदध्नो ... स्तद्धर्मानुग्रहे प्राप्ते ब्रूमः। भूयसां म
ध्यादीनां धर्मौ वार्त्रघ्नावनुग्रहीतव्यौ। यद्यपि मुख्यायमह प्रथममवगम्यते तथा ... पि पश्चाद्भूयोनुग्रहमालोच्य बाध्यते।
सोयं प्राप्तबाधः। तस्मात्पौर्णमासिकौ धर्मावनुग्रहीतव्यौ॥७॥ मुख्यं वा पूर्वचोदनाल्लोकवत्॥ यत्र समसंख्यानां धर्म
विप्रतिषेधः तत्र कस्य स्वधर्मत्वात् कस्य वान्यधर्मोपजीवनमिति चिंतायामपि नियमप्राप्तो मुख्यस्य स्वाधर्म्यमिहे।
तद्विषयत्वादित्याह अतएवेति। अतएवाग्निनार्थत्वादेन ३ ॥१५ आज्यभागमंत्रोदाहरणं चातुर्होत्रापौर्णमासीमभिमृशेत् संचहोत्रामावास्यामभिमृशेदिति मंत्रयोर
प्युपलक्षणं। न ह्यभिमर्शनद्वयमस्ति येनैकं रूपापरं क्रियेत वाक्यांतरविहितोप्यभिमर्शनेमंत्रद्वय
मिदं च व ... मर्शनं स निपातस्यापि संस्कारकत्वाद्भिषापात्रप्रोक्षणं
सा १

सिद्धौ तमाहप्रधानेति। प्रधानविधिः साक्षात्प्रधानप्रयुक्तेः पश्चादङ्गेष्वनुतरतीति ततोपि पश्चादङ्गेषु तत्रानुष्ठानतो जघन्यस्यापि एकस्यापि च प्र
धानस्याङ्गे प्राक्प्रयुक्ते तद्विरुद्धमङ्गगमनुष्ठानतो मुख्यमपि द्वयोपि न नु प्रयोक्तुं क्षमते इत्याशयेन विरुद्ध्योनेति सर्वाणीति ११

तस्य हि धर्मो संनिपातविरोधावस्थायां निर्विघ्नमवगम्यते। ज[...]न्यस्य तु तद्विरुद्धत्वान्न धर्मः संग्रहीतुं शक्यते। न
चात्रावगतस्य त्यागेनावगतसंग्रहे च किंचित्कारणं भूयस्त्वं प्रधानधर्मत्वं वास्ति। तस्मादत्र मुख्यस्य स्वार्थ्यमिति। ५२
किमिहोदाहरणं। अध्वरकल्पायां श्रूयते। आग्नावैष्णवं द्वादशकपालं निर्वपेदपराह्णे सरस्वत्याज्यस्य य
जेतेति। तत्राग्नावैष्णवस्यौषधद्रव्यकत्वे हि देवत्वद्वादशकपालत्वे ऐन्द्राग्नविकारत्वाद्दार्शिकं तन्त्रं। आज्य
10 स्य तूपांशुयाजविकारत्वात्पौर्णमासधर्मापेक्षा। तत्र सर्वदाज्ययागमंत्रयोर्विरोधे मुख्यधर्मत्वादृष्यन्वत्यो
ग्रहीतव्यौ एकाधिकरणपले कीयमतत्वेनोपन्यासाद न्याय्यत्वात्त्वपरमतमेव। न ह्यल्पवैगुण्ये संभवति भूया
वैगुण्यं प्रयोगवचनः क्षमते। अवगतमपि ह्यधिकारणान्तरवशाद्बाध्यत एव। यथोपरितनेधिकरणे मुख्यमपि दी
क्षणीयाधर्मत्वं बाधित्वा प्रधानधर्मत्वबलेन सुत्याकाल एवानुग्रहीष्यते। तथा भूयस्त्वेनापि। तस्मादुक्तवाधि
करणे॥ ८॥ अंगगुणविरोधे च तादर्थ्यात्॥ दीक्षणीयायाः सोमस्य च यद्दिष्टापशुना सोमेनेत्यादिवचनेन प
र्वकाले प्राप्ते सत्येकाहदीक्षापक्षे द्वयोः कालासंभवात्कस्य कालोनुग्राह्य इति विचारे। नियमे मुख्यकालत्वाद्दा
दीक्षणीयाधर्मानुग्रहे प्राप्ते प्रधानधर्मत्वात्सुत्याकालानुग्रहः सर्वाणि ह्यङ्गानि तदङ्गानि च प्रधानसाद्गुण्या
य क्रियन्ते। न च साक्षात्त्वाद्गुणसंभवे परंपरामाश्रयति। तस्मात्प्रधानकालानुग्रहोयं। प्रागभावचिंतापी यम २०
यं विप्रतिषिद्धधर्मसमवायप्रसंगादिह कृता। ९॥ परिधिर्द्व्यर्थत्वादुभयधर्मा स्यात्॥ परिधौ पशुनि यु

धर्मेषु २ उत पशुरेव तन्त्री सवनीयास्तान्त्रिण इति ११

जीतेति परिधानं यूपकार्यं च कुर्वन्परिधिः परिधिधर्मांस्तं मार्जनादीन् यूपधर्मांश्च परिव्याणादीन् लभेतेति प्राप्तिसूत्रमेतत् ॥१०॥ यो प्यस्तु विरोधेन स्यान्मुख्यं नं तर्पाल ॥ विरूढेषु किं यूपधर्माः कर्त्तव्याः परिधिधर्मा वेति संशये यूपस्य हविषा पशुना साक्षात्संबंधात्प्रधान प्रत्यासत्तिः। परिधेस्तु हविरग्नि संस्कारार्थत्वा दित्प्रकर्षात्तेन यूपधर्मानुग्रहः सर्वत्र प्रधान प्रत्यासत्तेरिति प्राप्ते ब्रूमः। परिधेः सतो नियोजनविधानादपरित्यक्तस्व धर्मे परिधौ नियुंजीतेति नियोजनमात्रं ह्यत्र वाचनिकं तस्य युक्तास्त तक्षणादि धर्मा श्चोदकेन प्राप्नुवंतः परिधित्वानुपमर्द्देन भवितुमर्हंति। सत्यामपि च प्रत्यासत्तौ अंगधर्मत्व मुभयोरवि शिष्टं। तस्माद्विरोधे परिधिधर्माः कर्त्तव्याः ॥११॥ पशुसवनीयेषु विकल्पः स्याद्वैकतंत्र्यं दुभयोः प्रकृतिभूतत्वात् ॥ सवनीयः पशुः प्रातः सवने प्रारभ्य तृतीय सवने समाप्यते। वपया प्रातः सवने प्रचरंति पुरोडाशेन माध्यंदिने अंगैस्तृतीयसवइति। सवनीयाः पुरोडाशाः प्रति सवनं विहिताः। अनुसवनं सवनीयाः पुरोडाशा निरूप्या इति। माध्यंदिनीयानां तृतीयसवनिकानां च पुरोडाशानां तंत्र मध्यपातादसंदिग्धं प्रासंगिकत्वं। प्रातःसवनिकानां पशोश्च मिथश्चिंता। किं पुरोडाशास्तंत्रिणः पशुः प्रसंगी अथवा तंत्रीति प्रसंगिणः यस्य सर्व मुपक्रमो यस्य वा पश्चात्समाप्तिः स तंत्रीतरस्तु प्रसंगी। तत्रेह कस्य प्रथममुपक्रम इति विशेषो नावगम्यते। ननु समाप्तावस्ति विशेषः पशोस्तृतीयसवने समाप्तेस्स एव तंत्री स्यात्। प्रातःसवनिकाः पुरोडाशा हि

एवं हि प्रैषस्यास्याग्रहणः। द्वितीये सवनीयानां वैगुण्याप्रतिनिदीयश्चिह्नकृत्वका भावादनुभवप्रथमापि प्रकृतिविरोधः
साशये नाहनापीति। नापि चतुरन्यतमः पशौ रस्ति येनायमुच्येत स्वाहास्याधकस्यनिरासेयोऽपि। किं च। यथैकादशी ध्वर
कस्यायां पुरोनाचः प्रवदितो निर्वयदिति प्रातः कालि कृत्वनिर्वापे प्रातः कालसामान्यप्राप्तो तद्विशेषमात्रविधिर्लोघवाद् स्यक्रमेनमि

प्रातःसवनेन समाप्यंते अतस्ते प्रसंगिणः। मैवं। तेपि तृतीयसवने समाप्यंते आग्निमारुतादूर्ध्वम[..]नूया
जेश्चरंतीति पौरोडाशानुयाजोत्कर्षविधिरस्त्विति मन्यते। तस्मादविशेषः॥ उच्यते। पशुरेव तंत्री तत्रेत्वग्निमद्यहो
तारमवृणीतायं यजमान इत्यादि सूक्तवाकप्रैषो मैत्रावरुणकर्तृको ग्नीषोमीयपशौ श्रूयोदकेन प्रामः पुनरग्निम
द्यहोतारमवृणीतायं सुतीयजमान इत्यादिरूपेण विकृतः प्रत्यक्षेण सवनीयपशौ पठ्यते। सोयमनर्थकः पु
रोडाशानां तंत्रित्वे स्यात्। न ह्यतेषामयमंगं। नापि मैत्रावरुणस्तेषामस्ति येनायमुच्येत विकल्पेपि नित्यवद्व
चनानर्थक्यात्। तस्मादि[..] नेन पशुवैशेषिकांगमानेन पशुरेव तंत्रीति निश्चीयते। किंचाग्निमारुतादूर्ध्वमनु
याजैश्चरंतीत्ययमपि पशुकानामेवानुयाजानामुत्कर्षः। तेषां ह्यंगैस्तृतीयसवन इत्यंगप्रचारोत्कर्षादिव
तृतीयसवनसंबंधे प्राप्ते प्रदेशविशेषमात्रं मुखेन विधीयते। पुरोडाशानां त्वनुसवनं निरूप्यं तद् इति च
न प्रातःसवनसमाप्त्यवगमात्। तद्विरोधे नायुक्तं तदीयानुयाजोत्कर्षविधानं। तस्माद्दीर्घकालत्वात् पशोस्तं
त्रिता। तन्मध्यपातानु पुरोडाशाः प्रसंगिनः॥१२॥ पूर्ववविकृतौ समानतंत्रा चेन्नित्यत्वादनर्थकं हि स्यात्॥ प्रकृ
तिर्यावज्जीवं पर्वणि पर्वणि प्रयुज्यते। विकृतयोपि कामेन निमित्तेन वा पर्वण्येवा[..]पतंति। तत्र प्रकृतिविकृत्यो
स्तंत्रेण प्रयोगं कृत्वा चिंत्यते। विरुद्धेषु धर्मेषु राक्षोघ्नी सामिधेनीत्यादिषु कस्य धर्मः प्रयुज्येत कस्य प्रसंगित्वमि
ति संशये प्रकृतेः सर्वप्रवृत्तत्वात् सैव तंत्रिणीति प्राप्ते ब्रूमः। यद्यपि तावत् पूर्वप्रवृत्ता प्रकृतिः स्यात् तथापि वैकृतमेवानु
ष्ठानं प्रकृते नैमित्त्याहन् चेति। अयमाशयः यावता नसंवेविहितत्वरूपा पूर्वप्रवृत्तिः स्यात् तद्धा धर्मात्रे हेतुर्नेतद् गमप्रसंगो हि
स्याद् शीनु पूर्वप्रवृत्तिः पूर्वापिक्रमे विधिरूपे हनासियावज्जीविकैकप्रयोगनिष्ठत्वात्। प्रतिपर्वं तु यत्प्रयोगः प्रकृतेस्तो विकृति
प्रयोगेण सहैवारभ्यते तत्तंत्रेण प्रयोगे कृत्वा चिंतनात्। न चैवमग्निहोत्रादिकाम्यप्रयोगास्य द्रव्योपक्रमे पूर्वप्रवृत्तस्य काना

पश्ववधातमात्रेहूतेहूतार्थातर्थमाहूताहविष्कृदितिस्रवनीयकाले तदर्थं पुनः साकालकोति पूर्वपक्षोपि। एवं च संशय
बीजस्य पूर्वपक्षस्य च सत्वेधिकरणांते प्राप्तिमात्रार्थ तोकिरनादस्यापरमेतमात्रं इति। सिद्धांतमाह अलक्षेति। नावघा
तमात्रेणहविः संपद्यते किंतु पाकोव्यापारेण अतोहविष्कृत समारब्धायाः पाककर्तृत्व मपि पश्वा अवगतं पत्न्यवह नी
तिलवयुस्यानुवादरूतित्व तोयसवनगतां गपाकपर्भतमाहूतानव त्याणलीसवनीयहविरर्थं नपुनराहूतकेति
नातेः। सवनीयप्रावृत्तो त्रैज्ञानमों प्यदिनसवनगत सवनीयहविः परः। नातोयसवनिकसवनीयहविषामुत्तराधिक
रणोक्तिं तत्तदिति॥ ॥पूर्वपक्षमाहरूपस्येति। रूपस्येकहविरन्तरितः प्रधानयागानुयहीनतद्धर्मस्यापिरूपहविरूपयोन्तरितः प्रधा
नान्वयादन्तरंगत्वं परिधेराग्नहविरूपयोन्तरितः प्रधानान्वय इति परिधिधर्मस्य परिप्पगिन हविःसिद्धतया तरितप्रधानान्वया
द्बहिरंगत्वमित्यर्थः नचात्रान्यो बाधन्यायो। सिद्धमुखत्वतज्जयस्यौपदेशिकत्वादिरूपयोरप्यतिदेशतो युगपद्बोधात्समस
र्व्यत्वाच्चेन्यंतरंगत्वादेवनिर्णयरूत्याहतेनेति। अंतरंगबहिरंगन्यायव्यतिरिक्तेनेववाधन्यायेनताबहिरिंद्रानमाह परिधे
रिति। अग्निपरिधानार्थत्वग्रहोक्तिनिमित्तकेन परिधिशब्देन पुरोडाशकपालस्येव स्वकार्ये पितृपरिधान प्रयुक्तस्येव
नियोजने विनियोगात्स्वकार्येण स्वधर्मविशिष्टस्येव प्रयुक्तत्वादुपजीव्योपजीवकत्वाविनातिदेशाविषयोपिअ
त्रबाधः। प्रथमहत्रपरिधिः स्वधर्मको रूपश्चस धर्मकोतिदेशानुप्राप्तो ततः परिधोपस्तुं सिद्धं जीवतिउ नदेशस्ते ता
द्वितीयेनातिदेशेनस्थानापत्तिमूलकेन परिधोरूप धर्माः प्राप्ते तत्र पूर्वेणातिदेशेन योसौ पारिधिः सधर्मकः स
धर्मकरूपातिदेशस्य मध्यकालमतिदिष्टः स उपजीव्य इति तमुपजीव्यस्यैवमुपदेशमुपजीव्या प्रवर्तनातिदेशो नवाधन
रूसाशयः। अंतरंगबहिरंगन्यायवस्तु नवा दितिप्रापि कांधिकरणसिद्धांतप्राप्त
पादकस्यात् इत्याहस्तस्यामपाति। अंगधर्मत्वमिति सेनेनपूर्वन्यायाभावोप्युक्तः। तत्र हि त्रया

न कालं पूर्वं प्रयुंक्ते प्रधानविधिः। पश्चादङ्गाङ्गकाले इष्टकर्मसहत्वात् प्राबल्येनाङ्गत्वात्तावेव परिधिधर्मस्य रूपधर्मस्य नान्यतरो

पि स्यात्क्षात्प्रधानधर्मः अतो युगपदेव प्रयुज्येते इति॥ ॥एवं पशुसमापनस्येति। अत्र वाशब्दात्सभ्यासमाप्यभावे सति पूर्व

मुपक्रमस्तादभावे च पश्चात्समाप्तिरिति सावधिकमिति। त्रिदिवस्य मुख्यत्वादिति। तदप्युक्तं पशुपुरोडाशानां त्रिणि पशोर्निशीथे त्रिणि

च दर्शितदभावात्पूर्वं चोपक्रमो सभ्यास्य समाप्तेः अतः प्रकृतोपि स्वयेवेदमेव व्याख्यायं सा व्याहारं सिद्धान्तदूषणार्थत्वेनप

शुसवनीययोर्मध्ये यस्य पूर्वमुपक्रमो यस्य वा पश्चात्समाप्तिः सर्वत्रैस्यादितरस्य प्रसंगी स्यादिति। तत्र प्रथममुपक्रमसावत्

कस्यापि नास्ति प्रातरनुवाककाले युगपदेवोभयोरपि प्रक्रमादित्याह तत्रेति। आग्निमारुतादूर्ध्वं पाशुकान्यनुयाजोत्कर्षात्स

शेषः पश्चात्समाप्तेः तत्र तावत्कालेन निश्चितमित्यत उत्कर्षविधानं अनुयाजेत्यस्य विशेषश्रवणात् पौरोडाशिकोनाम पन्नयाजानामयमु

त्कर्षविधिर्न पाशुकानामेव नहि विशेषः अत्र स्यात् आग्निमारुतादूर्ध्वं पाशुकैरनुयाजैरिति नानिद्रष्यति मेव मिति पौरोडाशि

को नाम पन्नयाजानामुत्कर्षस्य विधिरसंघः। उच्यत इति। इषितादेव्याहोतारइति दार्शिकः सूक्तवाकोग्नीषोमीयपशौ अतिदि

ष्टः स एवायं निरूढ स्त्रात्रैव पठितः अग्निमद्य होतारमवृणीतायं यजमान इति। ननु सुत्यासुत्यागतौ विकृतपाठोग्नीषोमीयातिदिष्टस्यै

वेति चेन्निर्णयेन ततः सवनीयपशौ रेवायं न सवनीयानामिति निश्चीयेत। सवनीये पुरोदाशिकः सूक्तवाको निदिष्ट एवतस्यैवा

यं सुत्यासुत्यागतौ विकृतपाठो स्वीस्यत आह अग्नीषोमीयादिस्यादि। सवनीयेऽतिदिष्टस्य दार्शिकस्य सुत्यासुत्यागतो विकृ

तपाठश्चेत्तनो गौरवं स्यात् अग्निमद्य होतारमवृणीतायं यजमान इति निषण्णाम प्राकृतानां पदानामुपदेशात् अग्नीषोमी

यातिदिष्टस्य विकृतपाठे पूर्वेषां गणानां पदानां तत्रैवोपदिष्टानां चोदकात्प्राप्तेः सुत्यासुत्यो स्येवोपदेष्टव्य मिति लाघव

मिति न्यायः। एतदेव स्पष्टयति पदषट्कापेक्षमेव पुनः पदं प्रयुक्तं। किं च मैत्रावरुणः कर्त्तात्र प्रैषाः निदिष्टः सवनीयानां चत

त्रित्वे किमस्मो तदीयचतुरन्यतमेन ऋत्विजा पठनीयः उत मैत्रावरुणेनेति। अथ पशौ वैगुण्यापत्तिः मैत्रावरुणकर्तृक ११

देवा काम्यप्रयोगविधिर्हि कामोद्देशेनापि अननुष्ठापयन्नानर्थकः स्यात् यथा यदा काम्यप्रयोगस्तदा नित्यप्रयोगो नियमेन प्रसक्तः आसादिते वितते चैवं न्याय इत्यप्रकृतेविकृतिविशेषविधीनां स्वेव प्रसंगोपकारित्वं साध्यतीति पूर्वः पक्षः तत्र नैव कदाचिद्विपरीतप्रसंगः स्यादतस्त्वेनास्य मुख्यमिति ॥२

स्थितं । इतरथा सर्वदैव प्राकृतानां प्रयोगाद्विकृताविशेषविधयोऽनर्थकाः भवेयुः । न च पूर्वं प्रवृत्तापि प्रकृतिः न ह्यपृथक् कोष्ठावञ्जी विकः प्रयोगः पर्वणि पर्वणि भिन्नाः प्रयोगाः प्रक्रम्यन्ते प्रवृज्यन्ते च । तस्मात्कामेन निमित्तेन वा प्रवर्तितायां विकृतिरेवोत्सर्गिकी नित्यचिकीर्षा बाधित्वा निविशत इति वैकृतमेव तन्त्रं प्रकृतौ प्रसज्येत ॥१३॥

अधिकश्च गुणः साधारणो विरोधात्काम्यमेऽतिवदमुख्येऽपि ॥ आग्रयणेष्ट्यामैन्द्राग्नवैश्वदेवद्यावापृथिव्यानि हवींषि । तत्र द्यावापृथिव्यस्य वैश्वदेविकद्यावापृथिव्यधिकारत्वात्सस्तरणं बर्हिः प्राप्तम् । ऐन्द्राग्नादेस्तु प्रस्तरमप्रस्तरणं वा बर्हिर्मात्रम् । तत्र समानतन्त्रे बुद्धिः प्रस्तरणमप्रस्तरणं वोपादेयमुपपन्नमिति संशये मुख्यत्वात्स्तराबर्हिर्नियम एव युक्तः । मैवम् । न ह्यनियमो नाम किंचिदंगं यदनुगृह्येत । बर्हिर्मात्रं त्वंगं न च प्रस्तरणोपादानेऽप्यविरुद्धमिति न कस्यचिद्वैगुण्यम् । अनियमे तु द्यावापृथिव्यस्य वैगुण्यं स्यात् । न चावैगुण्यसंभवे तद्युक्तम् । तस्मात्सस्तरणमेव स्यात् ॥१४॥ तत्स्वर्वत्तु तन्त्रिनियमः स्याद्यथाप्राप्तमुक्तं सस्तरणवाक्येन ॥ एवं तर्हि नैव द्यावापृथिव्यतन्त्रलिंगमस्ति न बर्हिषा सर्वमेवेदं द्यावापृथिवीयतन्त्रं ऐन्द्राग्नादेस्तु तदेव तन्त्रं प्रसज्यते । अतो विरुद्धेषु विधर्मेषु द्यावापृथिवीय एव स्यात् । मैवम् । न ह्येतदेकान्तिकं द्यावापृथिवीय तन्त्रलिंगं साधारणमिदमविरोधात्संगृहीतं न त्वनेन द्यावापृथिव्यं तन्त्रं नियन्तुं शक्यम् । तस्मात्सर्वेषु त्रिण इति विरुद्धेषु धर्मेषु ऐन्द्राग्नादिधर्माः कर्तव्या मुख्यप्रशस्त्याभ्याम् ॥१५॥ ॥ इति शास्त्रदीपिकायां द्वादशाध्यायस्य द्वितीयः पादः ॥ विश्वजिति वत्सत्वगहतानि

सधावर्योधिकरणे विशेषिकस्तु नाकप्रेषवत् एव तत्रितार्वं । मैवमपरनवार्वत एव तन्त्रितोऽस्याशयः । मैवमिति । यद्यपस्यैवासाधारणमंगं प्रमाणान्तरादेव घटते तन्तुनस्ये वतात्रितं नियमयतिहार सप्तस्त्रीर्नामित्र स्वधर्मेषु प्रसक्तौ तु नास्या धारणद्यावापृथिव्यस्यैवांगं इतरत्राप्यनियमेन तस्याङ्गत्वादमायरो मुख्यानाने भूयान्नेवाप कारसिद्धौ प्रसंगस्तदसिद्धौ तु नाधारविवक्षाशयः ॥५

तदेषु तत्र भूयस्त्वादहतं स्यात्॥ अहर्गणे विश्वजित्प्रथममहस्ततोऽतिप्लवः षडहः ततो विश्वजित्। तत्र विश्वजिति ति
म२ नोऽधियेनैकाहविश्वजिति क्षौमं वस्त्रं धातुदेत्यवसाने त्वचं परिधत्त इति वत्सत्वक्प्राप्तिः। इतरेषु तु ज्योतिष्टोमादहतं
वासः तत्र ह्यूधर्मत्वादहतानुग्रहः। एकाधिकरण्यवाद्विमते तु सत्त्वान्यथाकरणं भाष्यकारेणादर्शितं। सिद्धांत
स्तु सर्वेन दृष्टयोः परिधानार्थत्वान्महाव्रततापीदिवच्च वासांसि विस्त्रंसयतीत्यादिवासो बहुत्वादर्शनादस्ति
समुच्चयेन दृष्टं वासो बहुत्वं तथापि कौपीनाच्छादने वत्सत्वचोऽयोग्यत्वादुपरिवासः कार्ये सो विधीयते। तत्रा
पिह्नि परिदधातीति प्रयोगात्कंबलं परिधत्त इतिवत्। अहतं तु कौपीनाच्छाद[illegible]न योग्यं तत्रैव विधीयत इति द्वयो
रपि स्त्रिन्नकार्यत्वात्समुच्चयः॥ १॥ अनुनिर्वाप्येषु भूयस्त्वेन तंत्रनियमः स्यात्॥ अग्नीषोमीयस्य पशु
पुरोडाशमष्टौ देवसुवां हवींष्यनुनिर्वपतीत्यनुनिर्वाप्याणां स्वाधर्म्यं पुरोडाशस्य प्रसंगित्वं विपरीतं वेति सं
शये भूयस्त्वादनुनिर्वाप्याणामिति प्राप्त उच्यते। नहि तेषां सह चोदना। नापि सहोपक्रमः। किंतु पशुपुरोडा
शतंत्रे प्रक्रांतेऽनुनिर्वाप्याणां तन्मध्ये विधानाद्धि स्वधर्मप्रसंगित्वं तरस्य च तंत्रित्वं। तंत्रिधर्मश्च प्रसंगिविरु
पजीवनीय इति पशुपुरोडाशस्य स्वाधर्म्यं। येतु सर्वेष्वपि तंत्रिषु विप्रतिषिद्धविषये मुख्यस्यैव स्वाधर्म्यं न राम
भूयसामित्यैकाधिकरण्यमाश्रित्य वदंति तेषां प्रसंगिभ्योऽनुनिर्वाप्येभ्यो मुख्यवलीयस्त्वमित्यधिकरण १२ विस्पष्ट
मिदमनर्थकं स्यात्। ऐकाधिकरण्यमेव विस्पष्टीकर्तुमिदमधिकरणमित्येतत्तु लज्जाम्लान्यभानां वै[illegible]त्यं नाथितं॥ धार्ष्ट्य१

तं ४ पा १

किंच विप्रतिषिद्धधर्माणां समवाये ऽन्यतमस्य साधर्म्यं मुख्यं वा स्वधर्मेति सामान्येनोक्तानुनिर्वाप्येष्विति विशे-
षमुपादाय तद्विषये ऽन्यतो ऽपि मुख्ये वल्लीयस्त्वमित्युक्तिर्विधानात्तत्रान्यतमस्यामेव स्वधर्मत्वं मुख्यसाधर्म्यं च स-
मसंख्यविषयमित्यधिकरणद्वयेऽप्येवस्य ष्टीभवति नैकाधिकरण्यमित्यास्तां तावत्॥२॥ एककर्मत्वि विस्पष्टला-
ङ्गुणानां सर्वकर्म स्यात्॥ दर्शपूर्णमासयोराघारो ऽप्रकृत्य श्रूयते। ऊर्ध्वमाघारयतीत्यृजुमाघारयति संतत-
माघारयतीत्यादि तत्रोर्ध्वत्वादीनां विकल्पसमुच्चयचिंतायामेकार्थत्वाद्विकल्पप्राप्तौ सर्वेषां सहसंभवा-
त्समुच्चयः॥३॥ एकार्थास्तु विकल्पेरन्समुच्चये त्वावृत्तिः स्यात्प्रधानस्य। व्रीहिभिर्यजेत यवैर्यजेतेत्या-
दिष्वपि सर्वाङ्गोपसंहारिप्रयोगवचनानुग्रहायाष्टदोषनिदानविकल्पपरिहाराय च समुच्चयः स्यात्
संभवति च ज्योतिष्टोमवदभ्यासमाश्रित्य समुच्चयसंपादनं मिश्रैर्वैज्यतामिति प्राप्ते ब्रूमः॥ एकार्थि-
नामेकस्मिन्नुपकारे ऽन्योन्यानपेक्षतया विनियुक्तानां विकल्पः स्यात्॥ ज्योतिष्टोमो हि द्रव्यदेवताना-
मदृष्टार्थानामपर्यायविधानात्सकृत्करणेन युगपद्ग्रहणात्सर्वसंपादनाय युक्तं यदभ्यस्यते। व्रीहियवौ
तु द्वाभ्यां वाक्याभ्यामन्योन्यनिरपेक्षौ यागद्रव्यपुरोडाशप्रकृतितया विधीयमानौ तद्द्वारेण प्रयोगवचनो च २
गृह्णन्पर्यायेणैव गृह्णाति न युगपद्येन बलात्प्रधानाभ्यासः स्यात्॥ ज्योतिष्टोमवत्। मिश्रत्वमपि निरपे-
क्षविधानादयुक्त[illegible]मेवा समुच्चित्य यजतो वाक्यद्वयमपि बाधितं स्यात्। द्वाभ्यामपि वाक्याभ्यां द्वयोरपि

।भिन्नाइति। माध्यन्दिनैस्तु अकेनैव जुहोति सप्तदशेति। इदमनुपपन्नं। विध्यतिक्रमे हि दोषो भवति अंगनाशे च विध्यतिक्रमो भवति हवि
ष्यग्रहणेन निर्वापादिना कपाले चासादनादिनोपात्तमंगं भवति तेन हविषः स्कन्ने दग्धे कपालस्य च भेदे ऽंगभ्रेषाद्दोषाव
भावान्तत्समाधानार्थमेवेदमपि भवति। तिष्ठत्वेवैषोदाहरणार्थेन तत्रापि अन्तरवपक्षे अर्थसमवायात्प्रायश्चित्तमेकदेश
निरपेक्षयोः प्रकृतित्वेन विधानात्तद्वलेनद्व्यांतरनिवृत्तिप्रतीतेः। तस्माद्विकल्पः। ततो व्रीहिप्रयोगे तैरेव कार्य
सिद्धेर्यवानामनुपादानं। यथा पांशुकैरंगैः कार्यसिद्धेः पौरोडाशिकानां। ननु वान्यार्थेनान्यस्य कार्यसिद्धिः प्रसंगः
साधारणे च वैतंत्रं परार्थे तु प्रयोजकः। एवमेव प्रसंगः स्याद्विद्यमाने स्वके विधावितिवचनात् अत्र तु द्वयोरप्या
न्यार्थत्वान्नास्ति प्रसंगरूपं सत्यमेतावान्विशेषः। तथाप्यन्येन कार्यसिद्धेरन्यस्य निवृत्तिरित्येतावता सामान्ये
नात्र संगतिः॥४॥ प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात्सर्वस्य निर्घातः। यानि प्रायश्चित्तानि कर्मवै
गुण्ये निमित्ते विधीयन्ते यथा दर्शपूर्णमासयज्ञ आर्त्तिमियादृः स्वाहेति गार्हपत्ये जुहुयाद्यो मावास्यां पौर्णमासीं वा
तिपातयेदग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्। यो मावास्यां पौर्णमासीं वातिपातयेद्वैश्वानरं
द्वादशकपालं निर्वपेदित्यादि वैगुण्यसमाधित्सया विधानात्समाधानार्थानि यानि एकस्मिन्वैगुण्ये वि
धीयन्ते पथिकृद्वैश्वानरादीनि तेषां विकल्पसमुच्चयचिन्तायां मदृष्टार्थत्वात्समुच्चयप्राप्तावेकैकेन वाक्येन वै
गुण्यसमाधानाय निरपेक्षविधानाद्विकल्पः॥५॥ समुच्चयस्त्वदोषार्थेषु॥ यानि पुनर्न दोषनिर्घातार्थानि नि
मित्ते कर्मांगानि विहितान्यनुहोतादीनि तेषां प्रयाजादिवदपर्यायविधानात्समुच्चय इति प्रत्युदाहरणमात्रमेतत्॥
॥६॥ मन्त्राणां कर्मसंयोगे स्वधर्मेण प्रयोगः स्याद्धर्मस्य तन्निमित्तत्वात्॥ पर्वतोनाध्येतव्यमित्यादयो ये मन्त्रा
णामध्ययनकाले स्वधर्मास्ते कर्मकालेपि स्युर्न वेति संशये मन्त्राणां प्रयोगार्थत्वात्कर्मकालेपि प्रयोगा
एकस्मिन्वैगुण्ये निमित्ते विहितं प्रायश्चित्तं द्वयोरप्याकांक्षायां निमित्ते तु वैगुण्येनेकनोपस्थितं तत्समाधानमप्येक
मेव प्रायश्चित्तं तत्स्पष्टदृष्टार्थत्वे सत्येकेन कार्ये ... स्याद्व्रीहियववदेव विकल्प इतिभावः॥

राम
१३

त आपि स्युः। नैवं। प्रकरणादेतेषां धर्माः स्वकर्मकालेऽनुसमनुष्ठेयाः। ध्यायविधिविहितस्य ग्रहणार्थस्याध्ययनस्याविप्र
समाप्त्युपकारेणांगभूताः। कः प्रसंगो यत्कर्मणि धर्मादरः। एवं पक्षे विधीयमानानां धर्माणां मंत्रप्रयोगार्थत्वे
न कर्मकालेपि प्राप्तेः तद्विषयः स्वाध्यायसमयवर्तिन एव प्रसंगात्कर्मकालेप्युपकुर्वंतीति सिद्धांते तु नेत्येवं विधेः प्र
संगाप्रसंगविचारात्संगतिः।६॥ भाषास्वरोपदेशे वेदवत्स्यानिवचनप्रतिषेधः स्यात्॥ ये मंत्राः समाम्नाये स्वरांत
रेण समाम्नाताः। ब्राह्मणे स्वरांतरेण पाठास्ते किं स्वसमाम्नायसिद्धेन स्वरेण प्रयोक्तव्या उत ब्राह्मणस्वरेणे
ति संशये वाचनिकत्वाद्ब्राह्मणस्वरस्यैतेनैव प्रयोगः। नैवं। ये तावल्लिंगाविनियुक्ता मंत्रास्तेषां ब्राह्मणस्य गु
णार्थवादपरिसंख्यार्थत्वान्न मंत्रस्वरूपे तत्स्वरे वा व्यापारः। येपि वचनविनियोज्यास्तेष्वपि मंत्रविनियो
गवचनं न तत्स्वरविनियोगे व्याप्रियते। स्वरांतरोपादानं तु ब्राह्मणे प्रवृत्तस्य स्वरस्याविच्छेदार्थं। तस्मादा
म्नायेनैव स्वरेण कर्मणि प्रयोगः॥७॥ तन्न्यायत्वाददृष्टेष्वेवं॥ ये पुनर्मंत्रसमाम्नाये [illegible] नाधीता ब्राह्म
णे त्वाम्नाता मंत्रास्तेष्वपि ब्राह्मणस्य मंत्रस्वरूपविनियोगपरत्वान्न स्वरपरत्वं। अतो न ब्राह्मणस्वरेण प्रयो
क्तव्याः। नैवं। असत्यपि स्वरविनियोगे मंत्रस्य विनियुक्तस्य यथाविज्ञातरूपस्य प्रयोगात्तस्य च ब्राह्मण
स्वरातिरेकेण स्वरांतरानवगमान्नैव स्वरेण प्रयोगः॥८॥ मंत्राणां करणार्थत्वान्मंत्रांते न कर्मादिसन्निपा
तः स्यात्सर्वस्य वचनार्थत्वात्॥ करणमंत्रेषु किं मंत्रमध्ये मंत्रांते ततोपि वा क्रियंतेति कालं स्थितत्वासमवे

दीर्घमाघारयतीत्यपि यत्र श्रूयते तत्र दीर्घं दीर्घकालम् इत्यर्थः न च क्षणिकस्याघारणस्य दीर्घकालत्वं संभवति अत आह

क्षणिकस्याघारणस्य दीर्घकालत्वं कथं स्यादित्येतदर्थो विसातत्यविधिरित्याशयः । दीर्घाघारस्य संततः सातत्यमुच्यते इति नार्थः किंतु

दीर्घाघारत्वस्यैव सातत्यमुच्यते स्वर्गकामस्य कार्यमिति न तत्रोपि षष्ठी मे गौरस्यार्थः १०

तान्निधाय्यिपदानंतरं वा कर्मप्रयोगः किं वा सर्वमंत्रांते नंतरमेवेति संशये अनियमः समवेतानिधायि

नो वाक्स्मरणस्य संजातत्वात्तदनंतरमेवेति प्राप्ते ब्रूमः । सकलस्य मंत्रस्य विनियुक्तत्वात्सकलेन संपादि

तं स्मारणं कर्मांगं । अतः सकलमंत्रसमाप्तौ तन्निर्तं स्मरणं यावद्विभ्रष्टं तावदेव प्रयोगः कर्तव्यः

तेन मंत्रांतस्य कर्मादेः सन्निपातः ॥ ९ ॥ संततवचनाद्धारायामादिसंयोगः ॥ संततां वसोर्धारां जुहोति यत्र संततव

चनात्तस्य च साहित्यवाचित्वात्साहित्यस्य चानेकापेक्षत्वात्कर्मणश्चैकत्वात्कर्ममंत्रयोः साहित्यमिदमुच्यते । अतो

मंत्रादेः कर्मादेश्च सन्निपातः । स्यादेवं यद्येकं कर्म स्यात् भिन्नानि त्वत्र द्वादशैतानि जुहोतीति संख्यायाः कर्माणि तेषाम

विच्छेदः संततशब्देनोच्यते जुहोतीति तेषामुपात्तत्वात् । न मंत्रकर्मणोः साहित्यं मंत्रस्यानुपात्तत्वात् । अविच्छेदे पि सं 14

ततशब्दो वर्तते नैकैकत्वेन साहित्ये । अतोत्रापि पूर्ववदेव न्यायः ॥ १० ॥ आघारे च दीर्घत्वात् ॥ आघारं प्रकृत्याम्नाय

ते । संततमाघारयतीति । तत्र कर्मैकत्वात्संततानासंभवे मंत्रसाहित्यमेव विधीयते इत्यादिसंयोगः । नेत्याह । न

कर्मणः क्षणिकस्य दीर्घेण मंत्रेणोर्ध्वोध्वर इत्यादिना साहित्यं संभवः । अतो दीर्घाघारस्याघार्यमाणद्रव्य

स्य सातत्यमुच्यते । अतोत्रापि मंत्रांतकर्मादेरेव सन्निपातः ॥ ११ ॥ मंत्राणां सन्निपातित्वादेकार्थानां वि राम

कल्पः स्यात् ॥ करणमंत्राणामेकार्थानां रुगोवांविरुजत्वित्यादीनां व्रीहियवन्यायेन विकल्प इति प्राप्ते १४

सूत्रमेतत् अपवादार्थं ॥ संख्याविहितेषु समुच्चयः सन्निपातित्वात् ॥ चेतुसंख्यायुक्ता मंत्राश्चतुर्भिरभ्रि

काशितस्याभिप्रकाशनेशक्यमेव । अतो विकल्पः स्यादिति पूर्वः पक्षः । सिद्धांतस्तु यद्यपि प्रकाशितस्याभिप्रकाशनेश

क्यं तथापि अनुष्ठानार्थाया स्मृतेरेकेनैव [illegible] [illegible] चामी नीतेन कर्मादिसन्निपातात्समुच्चय इति २

आदिशब्देनार्थभावो विभजनुष्ठभावी विप्रजनुष्ठ आदीनां ग्रहणं २

दत्तेन समुच्चयः। संख्यावशेन हि सर्वत्र समुच्चयाश्रयणं। नचैवमिहास्ति। ब्राह्मणविनियोगस्त्वेषां लिंग॰
मादत्त इत्येवमादयस्तेषामपि पूर्ववद्विकल्पः। संख्यावशात्तु समुच्चयः। चतुःसंख्यादिकर्माङ्गभूतानां स
ति समुच्चये संपद्यते। तत्र पूर्वप्रयुक्तानां मंत्राणां संस्कारद्वारेणाकरणत्वं। चरमस्य तु साक्षादिति संख्यावच
नसामर्थ्यादध्यवसीयते। तस्मात्समुच्चयः॥१२॥ ब्राह्मणविहितेषु च संख्या च सर्वेषामुपदिष्टत्वात्॥
ये ब्राह्मणविहिता मंत्राः। उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति। यज्ञपतिमेव तत्प्रजया पशुभिः प्रथय व४
तीति। उरु ते यज्ञपतिरिति पुरोडाशं प्रथयतीति। तेषामपि सर्वेषामुपदिष्टत्वाद्विकल्पे च पाक्षिकबा
धप्रसंगात्समुच्चये पि संख्याविहितवत्सर्वेषां करणत्वोपपत्तेः समुच्चय इति वचनविनियोगाङ्गीकारेण
भाष्यकारेण पूर्वपक्षितं। वार्त्तिककारस्तु लिंगविनियोगेनैव मंत्राणां विनियोगसिद्धेः [illegible]
[illegible] नचैवमिहास्ति। [illegible] समुच्चयार्थमेव वचनं मन्यते। तस्मादपि
समुच्चय इति। मैवं। लिंगेनैषां निरपेक्षसाधनत्वावगमान्नु नियोगो नास्ति तेषां मंत्रस्वरूपविनियोगार्थः।
[illegible] येषां त्वस्ति लिंगं तत्रार्थवादाद्यर्थमिति न तेनापि समुच्च
यः॥१३॥ होत्रास्तु विकार्थत्वात्॥ उत्तुयस्व वनस्पत इत्यादयो ये क्रियमाणानुवादिनो होत्रा मंत्रास्तेषा
मपि करणवदेकार्थत्वाद्विकल्पप्राप्तावुच्यते। करणादिकर्मानुष्ठाने कारणभूतां स्मरति पूर्वक्षणवर्त्तिनी।

कल्पर॰ ॰ने २

क्रियावर्त्तमानसमकालस्यदीर्घत्वादाद्येन क्रियमाणानुवादिनाहृतास्मृतिर्यावत्कालमनुद्[illegible] [illegible]रस्तादपि स्मृत्यनु
इत्यर्थो परः क्रियमाणानुवादी एवं ततः परस्तादपातिकिं त्रकालीनस्मृत्यर्थत्वेन । किन्त्वार्थत्वात्समुच्चयइत्याशयः २

जनयंति । न चैकेन तत्सिद्धोइतरेणकार्यमस्तितितोयुक्तस्तत्रविकल्पः । क्रियमाणानुवादिनस्त्व
र्थस्तुगुणाः क्रियमाणस्य कर्मणः स्मृत्यविच्छेदार्थाः अविच्छेदश्चांतादपेक्षित इति सर्वेषां समुच्चयः ॥
१४ ॥ ॥ इति शास्त्रदीपिकायां द्वादशाध्यायस्य तृतीयः पादः ॥ जपाश्चाकर्मसंयुक्ताः स्तुत्याशीरभि
धानाश्च याजमानेषु समुच्चयः स्यादाशीः पृथक्त्वात् ॥ यत्र संतमप्यर्थप्रत्ययमविवक्षित्वाउच्चारणमा
त्रमदृष्टायक्रियते । वैष्णवीमनूच्यवाग्यंतव्येत्यादौ स जपः । गुणकीर्त्तनं स्तुतिः । अग्निर्मूर्द्धेति । आ
शासनमाशीः । आयुर्मेदेहीति । गुणविशिष्टयुर्णिप्रकाशनमदृष्टार्थमभिधानं । तेषु ब्राह्मणविहि
तवद्विकल्पप्राप्तौ अदृष्टार्थत्वात्समुच्चयः ॥ १ ॥ याज्यानुवाक्यासु तु विकल्पः स्याद्देवतोपलक्षणा
र्थत्वात् ॥ ऐंद्राबार्हस्पत्यं कर्मास्ति इह याज्यानुवाक्यायुगले समाम्नाते इंद्रं वा मास्येद्रहविः अयं वां परि
षिच्यत इत्येकं युगलं । अस्मे इंद्रा बृहस्पतिर्नः परिपातित्यपरं । तत्र समुच्चयविकल्पसंशये याज्या
पुरोनुवाक्ययोः सत्यपि देवतोपलक्षणार्थत्वेनैकार्थत्वे मिथः समुच्चयः तथा युगलयोरपि स्यादविशे
षादिति प्राप्तउच्यते । विकल्प एकार्थत्वादिति । याज्यापुरोनुवाक्ययोर्वा यो स्तु पुरोनुवाक्यासमाख्या
वशान्न्याय्यविकल्पबाधेन समुच्चय इति विशेषः ॥ २ ॥ कर्मणेषु तु विकल्पः स्यादेकार्थत्वात् ॥ एक

राम
१५

15

प्रा०२१

बृहस्पती । ५

हायन्याकुणीतिवासंसाक्रीणातीत्यिदृशाक्रयद्रव्याणि तेषांविकल्पः समुच्चयो वेति चिंत्यते। तत्रव्रीहियवन्याये
नैकार्थत्वाद्विकल्पः। कथंपुनरेकार्थत्वं क्रिन्नाएवप्रतिवाक्यंक्रयाः। नह्येकेनवाक्येनविहितंक्रयमनूद्यवा
क्यांतरेद्रव्यविधानंसंभवति। उत्पत्तिशिष्टद्रव्यविरोधात्। तस्मात्सर्वाणिक्रयविधानानिविधिभेदाच्चक्रयभेदः।
तस्मान्नानाक्रयसाधनत्वाद्द्रव्याणांनास्त्यैकार्थ्यं। सत्यंसाक्षान्नास्तिक्रयद्वारेणत्वस्त्येव। सर्वैर्हिक्रयैःसोमप्रा
स्व५ र्थत्वादेकार्थ्यास्तिद्वारेणाद्रव्याणामप्येककार्याणि। तदनेनप्रकारेण। [redacted]
क्रयाणामेवात्रविकल्पसमुच्चयौचिंत्येते। व्रीहिष्वव्यवाविकल्पप्रमाणावुच्यते। विक्रेतुरानतिरक्तप्रयोजनं। तत्र
वकुल्लिःसुकरं। अतःकार्यप्रधानत्वात्पदार्थानांसोकर्यमालोच्यसमुच्चयाश्रयणंन्याय्यं। व्रीहियवादीनांतुनैवं
किंचित्कारणमस्ति। येनपृथक्कृतानामपिसापेक्षत्वंकल्प्येत। अत्रतुकार्यविशेषात्सापेक्षत्वकल्पनमिति
वैषम्यं॥३॥ संस्कारेचतत्प्रधानत्वात्॥ अग्नीषोमीये पशौगुदेनोपयजतीतिश्रुतं। पशुगतानेकगुदसन्निपा
तेगुदानांविकल्पःसमुच्चयोवेतिचिंता। यद्यर्थकर्मततोविकल्पः अथप्रतिपत्तिस्ततःसमुच्चयः। तत्रसत्यपिद
तीयासंयोगेप्रयाजशेषवद्गुदस्यापियेनसंयुक्तमित्येवंसिद्धस्यप्रतिपत्तित्वस्यप्रयोजनकथनमेतत्॥४॥ संख्या
सुतुविकल्पःस्याकृतिप्रतिषेधात्॥ अग्न्याधेयांगानामेकादेयाषट्देयाइत्यादीनांदक्षिणानामानन्त्यर्थत्वा
त्क्रयवत्समुच्चयः। संख्याकृतिविरोधात्तुविकल्पः। समुच्चयेसंख्यांतरोपजननात्कृतसंख्याहानिःस्यात्॥५॥

इत्यविकारात्तु दर्शवदर्थकर्म स्यात्तथा विकल्पे नियमप्रधानत्वात्॥ दर्शपूर्णमासयोः पत्नीसंयाजेष्वाज्ये
क्र.२ न सह विकल्प्यमानाज्याघनी विहिता। आज्याघन्याः पत्नीः संयाजयंतीति। ततोपि पशुगणे चोदकेन प्राप्नोति। अत्र ब
हूनामाज्याघनीनां समुच्चयो विकल्पो वेति संशयः। यदि प्रतिपत्तिः x साचोदकेनाग्नीषोमीये प्राप्ता। अत्रापि
पुनः श्रूयते आज्याघन्या पत्नीः संयाजयंतीति। x ततः समुच्चयः। अथार्थकर्म ततो विकल्पः। तत्र यद्यपि दर्शपूर्णमा
सयोराज्याघनीगुणभूता पत्नीसंयाजानां तथाप्यग्नीषोमीये हृदयाद्यर्थालब्धपशुनिष्पन्नाया आज्याघन्याः प्रति
पत्त्यपेक्षायां प्रतिपत्तित्वेन पत्नीसंयाजविधानं। एवमर्थं पुनर्वचनं। ततश्च दृष्टार्थत्वात् पशुगणे समु
च्चयः। नैवं। आज्येन विकल्प्यमानाया आज्योदकप्राप्तायाः पुनर्वचनं नियमार्थं। यथाप्राप्तायाश्च नियमः। प्रा
प्तिश्च गुणभावेनेति तादृश्येव नियम्यते। अतः पशुगणे विकल्पः॥ ६॥ उखायां काम्यनित्ययोः समुच्चयो
नियोगे कामदर्शनात्॥ अग्नावुखं प्रकृत्य श्रूयते। वृक्षाग्राज्ज्वलतो ब्रह्मवर्चसकामस्याहरेदाव
दध्यात् क्षुधाद्यन्नाद्यकामस्येति। तत्र किं नित्यस्योखस्य काम्यस्य च वार्क्ष्याग्रादेः समुच्चयोऽथवानि नित्यो
वर्त्य इति संदेहेऽवधानमात्रं काम्यमुच्यते न होमः। तस्मात्फलाय काम्यमवधाय पुनर्नित्योग्नि
रुख्योऽवधातव्य इति समुच्चयः। स्यादेतदेवं यद्यवधानं विधीयते। प्रा[illegible]नमेव तु होमार्थमग्न्यवधानं राम
आग्निरुत्यागन्यतरमात्रं विधीयते। तस्मान्नेन काम्येन निवृत्तिः। विकल्पसमुच्चयविवादे समाप्ते समुच्चयरूपा

अवधानं धारणं२

16

तसेन कर्मणो नगसंस्कारस्य वैयर्थ्यापत्तेः। न चेदमाधानमवदाहवनीयजनकं सिद्धस्याहवनीयस्य धारणविधेः अतो आनी
सितकर्मार्थकुसप्तस्य योगो। कारणाग्निहोत्रदर्शपूर्णमासादियाज्ञिकचिकर्मार्थं धृताहवनीयस्य गुणकं धारणं विधीयते क
प्योफकष्ठकेनैमित्तिकस्य प्रयस्योपर्लाप्तदर्शावेश्वयस्येति तत्र गतश्रियः रातिषष्ठीश्रुः साहीद्पुरूपा धर्मभेवा ति।
स्ति नास्ती ति चिंत्यत इति संगतिः॥७॥ स आहवनीयः स्यादाहुतिसंयोगात्॥ सोयं कान्योग्निराहवनीयश
ब्दवाच्यः स्यादाहूयते स्मिन्निति। तस्मादाहवनीयधर्माः गतश्चाधारणादयोत्र कर्तव्याः। मैवं। आधानजन्मनः
संस्कारविशेषस्य वाचकोयमाहवनीयशब्दो नास्ति तस्मिन्संस्कारे वर्तितुमर्हति। तस्मान्नाहवनीयध
र्माः॥८॥ तस्मिन्संस्कारकर्माविशिष्टत्वात्॥ एवं तर्हि संस्कारास्तत्राधानाद्याः कर्तव्याः होमार्थत्वात्संस्काराणां
। अस्य चाग्नेर्होमसाधनत्वात्। सत्यं होमसाधनोपमग्निस्तथाप्यसंस्कृत एवायं संस्कृतस्याप्यनापन्न इति नात्र
संस्काराः कर्तव्याः। नहि वृक्षादाहृतस्यारणीमंथनादिजन्यः शक्यते आधातुं। तस्मान्नात्र संस्कारः॥९॥ नित्य संस्कारः इ
धारणे विकल्पो नस्यैकस्मात्प्रतिषेधः स्यात्॥ काम्याग्निप्रसंगसमाप्य पुनर्नित्यमेवोख्याग्निमुपक्रम्य चित
यति। किं मुख्यस्य नित्यधारणं नवेति विकल्प उताधारणमेवेति। तत्र न प्रतिसंदध्यादिति धारणप्रतिषेधो स
त्यां प्राप्तावनुपपद्यमानः प्रापकं विधिमनुमापयति। तेन चानुमितेनाविधिना प्रापितं प्रतिषेधेन च प्रतिषिद्धं
धारणं विकल्पमर्हतीति प्राप्ते स्निधीयते। सामान्येनाहवनीयधारणं गतश्रियो विहितं। उख्यश्चाहवनीयस्या
नापन्नः। आहवनीय एव संतापेनोख्यः संजातः। तस्य धारणं सामान्यवचनप्राप्तं गतश्रियो धारणमुख्य
विषयेनेन प्रतिषिध्यत इति नानेनाकृतविध्यनुमानं संभवति। तस्माद्धार्य एवायमुख्यः॥१०॥ परार्थान्ये
कोयजमानगणे॥ सत्राहीनयोरनेकयजमानसत्वामये यानि परार्थानि नियजमानसंस्कारार्थानि मुक्तान्वारं

गतश्चाधारणो आहवनीयसंस्कारकर्माभावात् नाम
आधानेनाहवनीयसंस्कारकत्वाक्लेनोत्पत्तिः ८

म ऽौदुंबरी समानादीनि तान्येकेनैव कर्त्तव्यानि न सर्वैः प्रयोजनाभावादिति प्राप्तिसूत्रमेतत् ॥ अनियमो वि
शेषात् ॥ स चोक्तोऽयः कश्चित्स्यात् । अतो येन केनचित्कृतमन्वारंभणादिकमितरे म संगादुपजीवंति । इदमपि
प्राप्तिसूत्रमेव सत्रे अपवादं वक्ष्यति ॥ मुख्यो वा विप्रतिषेधात् ॥ सत्रे गृहपतिरेव पुरार्थानि कुर्यान्नानि
यतः । कस्मादितरेषामार्त्विज्यविरोधात् ॥ ११ ॥ सत्रे गृहपतिरसंयोगाद्धोत्रवत् ॥ यानि पुनर्यजमानसंस्का
रार्थानि कर्माण्युपंजनाभ्यंजनादीनि तान्यपि सत्रे गृहपतिरेव कुर्यात् उत सर्वे यतिसंशयो गृहपतिः समाख्याना
त् । अत्र हि गृहशब्देन कर्मोच्यते । तस्य पतिर्गृहपतिः । सर्वेषां च यजमानानां स्वामित्वात् गृहपतिशब्दार्थत्वे सति वि ना६
शेषेण कस्यचिद्दृष्टा समाख्या फलभूयस्त्वनिमित्ता । फलभूयस्त्वं च संस्काराधिक्यात् । अतस्तस्यैव संस्का
रेणान्वेषणं । अत्राभिधीयते । फलिसंस्काराः सर्वेषामेव कर्त्तव्याः । तदभावे फलमेव न स्यात् । गृहपतिसमाख्या त्वार्त्वि
ज्याभावात् । इतरेषामार्त्विज्यं कुर्वाणाः कर्मकरा इव न भवंति । अयं तु केवलयाजमानकरणत्वाभिवाचिना गृहप
तिशब्देनोच्यते । न च तु फलभूयस्त्वं तत्तु वचनात् । स हि भूयिष्ठा गृहीम न होतीति न संस्काराधिक्यात् । अतः सर्वे
याजमाने कुर्युः । यत्रार्त्विज्ययाजमानयोर्विप्रतिषेधः तत्रार्त्विज्यमेव कुर्युः प्रधानत्वात् । कर्त्रा ते हि कर्मणां गु राम
णभूताः कर्तृणामपि गुणभूताः संस्काराः । प्रत्यक्षविधानाच्च । ये यजमानास्तेऽर्त्विजस्तेनैनयार्त्विज्यं यज १७ क३
मानानां विहितं । याजमानं तु चोदकप्राप्तमित्यार्त्विज्यं बलीयः ॥ १२ ॥ प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात् ॥ विप्रति
षेधे परमिति सूत्रे याजमानार्त्विज्ययोरार्त्विज्यं बलीय इति स्थितं न त्वसंगादार्त्विज्यं कर्म्मोरभ्रि संते । दर्शपूर्णमा

ज्य १

x विप्रतिषेधे परं ४

17

सऽज्योतिष्टोमादिषु किंत्वत्रिरपि द्विजातित्रिरात्र्विंज्यं कारयितव्यमुत ब्राह्मणैरेवेति संशयः। तत्रोक्तं नाव
ध्यमेह तितिविद्धत्वात्स्मरणं पुनः पुरुषार्थमतः कर्मवैगुण्यं नास्ति किंचन। याजनाध्यापनशुद्धप्रतिग्रहैर्द्रव्यमपि
स्येव वर्तयत्यापाद्इति नियमः पुरुषार्थतया स्मर्यते न क्रत्वर्थतया। तेन क्षत्रियवैश्यावार्त्विज्यं कुर्वतो न संस्क
क्रमात्त्कामंस्वधर्मात्स्यखवेयातां [illegible] न क्रतोः काचिद्गुणहानिः। तस्मात्त्रिरप्यार्त्विज्यं कारयितव्यमि
ति प्राप्ते ब्रूमः। द्विजोत्तमानामार्त्विज्यं न तु क्षत्रियवैश्ययोः। ब्राह्मणार्त्विज्यनियमः क्रत्वर्थेनापि हि स्मृतः।
यत्तैव्यास्त्र्यास्यामद्इत्युपक्रम्य ब्राह्मणानामार्त्विज्यमिति स्मरंतो यज्ञसूत्रकाराः क्रत्वर्थेन स्मरंतीति स्प
ष्टमेव। तथा च कुर्गंडामायणेपि क्षत्रियो याजको यस्य चांडालस्य विशेषतः। कथं सदस्यिनो कारोहविस्त
स्य सुरर्षयद्इति। सुरादेवताक्रमयस्यर्त्विग्भूता इति देवता हविर्भोगनिराकरणात्क्रतुवैगुण्यमेव दर्शितं। राज
याजकयाज्यस्य विनश्यतिपथा हविरित्यब्राह्मणार्त्विज्ये हविर्नाश स्मरतः। लिंगानि च दर्शितानि। ब्रा
ह्मणानामिदं हविरित्येवमादीनि। तस्माद्ब्राह्मणानामेवार्त्विज्यमिति सिद्धं॥१३॥ ॥मध्यतंत्रेषु यथाविधानं तेनु पूर्वक्रमे मध्यतंत्रप्रसंगः। जित्ताऽसौ योऽध र्मडक्रम्यचतुर्दश सपञ्चाशतो लक्षणेर्द्वादशांतैः॥ ॥इति श्री
पार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां द्वादशाध्यायस्य चतुर्थः पादोध्यायश्च समाप्तः॥
संवत् १९६६ समये काश्यां शिवरामयतीद्वैर्लिखापितं हरिकृष्णेन लिखितं भुसंन्यालः॥ ॥७॥ ॥७॥ ॥७॥

राम १८

यस्य ४

शारदीपिकाद्वादशाध्याय